वेदप्रामाण्य-मीमांसा

—श्री स्वामी करपात्रीमहोदयाः

मूल्यम १)

श्रीधर्मसङ्घशिक्षामण्डलग्रन्थमालायाः

पञ्चमं प्रसूनम्

वेदप्रामाण्य-मीमांसा

लेखकाः—

श्री पूज्यकरपात्रस्वामिनः

प्रकाशकः—

धर्मसंघ-शिक्षामण्डलम्

दुर्गाकुण्डम्, वाराणसी

प्रकाशकः—
धर्मसङ्घशिक्षामण्डलम्
दुर्गाकुण्डम्
वाराणसी

प्रथमं संस्करणम्
चैत्रशुक्ल पूर्णिमा २०१७ वि०
मूल्यम् : रूप्यकमेकम्

मुद्रकः—
मास्टर प्रिंटिंग वर्क्स
बुलानाला,
वाराणसी

१८ ... पुस्तकालय, ...

गमनिका

प्रमाण-तर्क-सद्युक्तिग्रथिताश्लिष्टसंगतिः ।
वेदप्रामाण्यमीमांसा समगात्परिपूर्णताम् ॥ १ ॥
गुरुदेवस्य कस्यापि करपात्रस्य दण्डिनः ।
कृतिरेषा विजयतां गङ्गेव विमलाशया ॥ २ ॥
इयं सा मानसोद्भूतकमलालिरिवोज्ज्वला ।
सेव्या परमहंसानां सुचिरायाभिजायताम् ॥ ३ ॥
देवभाषाराष्ट्रभाषायुगलोद्भूतविग्रहा ।
गाङ्गयमुनसंगत्यास्तुलनामियमृच्छतु ॥ ४ ॥
मनोहरन्ती विदुषां पश्यतां मुहुरादरात् ।
चम्पामालेव दूरेण धुन्वती दुर्ग्रहालिनः ॥ ५ ॥
मुक्तामालेव कण्ठेषु गुणगृध्नुभिरन्वहम् ।
ध्रियमाणा मनोह्लादमावहन्ती प्रसादिनि ॥ ६ ॥
प्रतिपच्चन्द्रलेखेव लोकैरुद्वेलितान्तरम् ।
संदृश्यमाना मङ्गल्या मञ्जुलालोकवर्धनी ॥ ७ ॥
बाध व्याघात-मिथ्यात्वदोषशाद्वलमुल्बणम् ।
नास्तिक्यवनसंभूतं चरन्ती गौरिव द्रुतम् ॥ ८ ॥

विभातवेलेवात्यन्तहारिणी स्फूर्त्तिदायिनी ।
बुधाम्भोजमहामोदमादधाना प्रकाशिनी ॥ ९ ॥
तर्ककाननकान्तारे मुहुर्भ्रान्त्वाप्रयत्नतः ।
तत आदाय कुसुमैः प्रत्यग्रश्रीमनोहरैः ॥१०॥
आलोड्य पूर्वमीमांसारत्नाकरतलस्थलीम् ।
गृहीतैरत्ननिकरैरनर्घै-रचितान्तरा ॥११॥
श्रुत्यन्तसारस्वर्णाद्रिस्वर्णतन्तुनियोजितैः ।
वेदप्रामाण्यमीमांसास्रगियं ग्रथितोत्तमा ॥१२॥
श्रीविश्वेशपदाम्भोजे लसच्छ्रीषिपुलेऽमले ।
समर्पिता विजयतां यावच्चन्द्रदिवाकरौ ॥१३॥

—श्री स्वामिमहेश्वरानन्दः
(पूर्वाश्रमे कविचक्रिकचक्रवर्तित्वेन प्रसिद्धाः
श्रीमन्महादेवपाण्डेयशास्त्रिणः)

❀ श्रीहरिः ❀

वेदप्रामाण्य-मीमांसा

अपूर्वः कोऽपि वेदेषु चमत्कारः । यत्र यत्र दृष्टिर्निक्षिप्यते, तत्र तत्र विस्मयः समुल्लसति । वाक्यत्वेऽपि तेषामपौरुषेयत्वम्, आनन्त्येऽपि सुश्लिष्टत्वम्, आपाततः पौनरुक्त्यबाधादिषु सत्स्वपि स्वतःप्रामाण्यम्, ग्रन्थरूपत्वेऽपि पारमेश्वरनिःश्वासलीलान्यायत्वम्, अनादित्वेऽपि प्राचीनतमत्वेऽपि प्रागैतिहासिकत्वेऽपि यथास्थितानुपूर्वीणां स्वरमात्रादिश्रुतिविपर्ययाभावः । स्मृतयः पुराणानि दर्शनानि वैज्ञानिकतत्त्वानि सृष्टिप्रक्रिया, सामाजिकरहस्यानि किंबहुना, सर्वमेव वाङ्मयमित एव निस्सृतम्, अनन्ताभिश्शाखाभिः समुपबृंहितो महान्तं विस्तारं लम्भितः, पवित्रेऽस्मिन् भारते वर्षे गुरुशिष्यपरम्परया चिरन्तनसमयादध्ययनाध्यापनघण्टापथमवतारितोऽविच्छेदेन प्रचलति । धर्मस्य सर्वस्वमेवेदम् । मन्त्रब्राह्मणाभ्यां विभिन्नोऽपि एक एव । यत्र यद्यपि चार्वाकैर्भूयो भूयः कुतर्कितम्, दिगम्बरैः सपराक्रममाक्षिप्तम्, ताथागतैः बंहीयो विरुद्धमाचरितम्, आधुनिकानामपि अध्ययन इव प्रवृत्तानामैतिहासिकानां दृशाऽवलम्ब्य विश्लिष्टा विक्षोभ एव समुत्तोल्यमानः निभालितः । यद्यपि सर्व एव प्राक्तनाः प्रतिक्षेपाः श्रीमद्भिः श्रीशबरस्वामिभट्टपादप्रभाकरप्रभृतिभिर्मीमांसकधुरीणैः विद्वन्मतज्ञैर्माननीयैर्वात्स्यायनोद्योतकरोदयनाचार्यप्रमुखैर्नैयायिककण्ठीरवैः षड्दर्शनीपण्डितप्रकाण्डैर्मनसाऽपि दुष्प्रधर्षैस्तत्रभवद्भिर्वाचस्पतिमिश्रैः सम्यक्समाहिता यथा सर्व एव प्रति-

वादिनः प्रतिहतोत्साहाः कुण्ठीकृता मौनमेव समालम्बिषत, न पुनर्विरुद्धायां दिशि लेखनीं समचारयन्। तथापि आधुनिकानां केषाञ्चन विद्वत्प्रतिभटानामाक्षेपप्रतिक्षेपसंरम्भकोलाहलो जागरित इव दृश्यते, उद्ग्रीव इव विलोक्यते, जनतामास्तिकीं विरुद्धां दिशं नयन् संलक्ष्यते स प्रशमनीयः किं ?ताननुसरन्तः प्राक्तना अपि पूर्वपक्षिण उत्तिष्ठमाना अवश्यं समाधातव्याः, सद्धार्मिकसमाजः समुत्साहनीय इति मया प्राक्तनान् सन्दर्भान् यथावन्निभाल्य स्वयञ्च युक्तिमुक्ता आकलय्य प्रयत्नोऽयमारब्धः । सोऽयं प्रस्तूयते।

प्रमाणानां प्रामाण्यादेव हि प्रमेयसिद्धिरिति नियमात् प्रथमन्तावत् प्रामाण्यस्वतस्त्वपरतस्त्वविचार एव आरभ्यते । दार्शनिकेषु मीमांसकधुरीणाः प्रामाण्यस्वतस्त्वमङ्गीकुर्वन्ति । तत्रार्थान्यथात्वमयथार्थत्वं वाऽप्रामाण्यम्, तद्विपरीतमर्थतथात्वं यथार्थत्वं वा प्रामाण्यम् । प्रथममन्यसापेक्षमितरत्तु स्वत एव । तत्र तत्त्वप्रदीपिकाकर्तॄणां चित्सुखाचार्याणामिदमभिमतम्—"विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वमेव प्रमायाः स्वतस्त्वम्। न चेश्वरज्ञानेऽव्याप्तिस्तस्याजन्यत्वादिति वाच्यम्;तत्र विज्ञानसामग्रीजन्यत्वविशिष्टतदतिरिक्तसामग्रीजन्यत्वाभाववत्त्वस्य सत्त्वात्। अप्रमासु विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तसामग्रीजन्यत्वं भवति, तदत्यन्ताभाववत्त्वं प्रमासु भवत्यत एव नातिव्याप्तिरपि ।

अप्रमातिरिक्तत्वेन हेतुना पटादाविव प्रमायामपि विज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तजन्यत्वाभावस्य साधयितुं शक्यत्वे न तदप्रामाणिकत्वमपि । न चात्र ज्ञानत्वानधिकरणत्वस्योपाधित्वम्, ईश्वरज्ञाने साध्याव्याप्तेः। नापि ज्ञानसामग्र्यजन्यत्वस्योपाधित्वम्, यज्ज्ञानसामग्रीजन्यं तत्त्वे सत्यतिरिक्तजन्यमप्रमाणवदिति व्यतिरेकव्याप्तावप्रमात्वस्यैवोपाधित्वात्। विज्ञानसामग्रीमात्रादेव प्रमो-

त्पत्तिसम्भवेन तदतिरिक्तस्य गुणस्य दोषाभावस्य वा हेतुत्वे गौरव-प्रसङ्गो विपक्षे बाधकस्तर्कः । न च प्रमा, विज्ञानहेत्वतिरिक्त-हेत्वधीना, कार्यत्वात्पटवदिति परतस्त्वप्रयोगोऽपि सम्भवत्येवेति वाच्यम् । प्रमा दोषव्यतिरिक्तज्ञानहेत्वतिरिक्तजन्या न भवति, ज्ञानत्वादप्रमावदिति सत्प्रतिपक्षसम्भवात् । न चाप्रमाज्ञाने तत्प्र-सक्तिः; प्रयोजकाभावात् । दोषासहकृतज्ञानसामग्र्याः प्रमाप्रयोजक-त्वेनाप्रमायां दोषसहकृततज्जन्यत्वेन तदसम्भवात् । न च तर्हि दोषाभावस्य प्रमात्वप्रयोजकत्वमिति वाच्यम् ; अन्वयव्यतिरेकयो-र्विरोध्यप्रमाप्रतिबन्धकत्वेनैवोपक्षीणत्वात् । न च संस्कारस्यानुभव-नाशकत्वस्मृतिहेतुत्वयोर्दर्शनेन दोषाभावस्याप्यप्रमाप्रतिबन्धकत्वं प्रमाहेतुत्वञ्च किं न स्यादिति वाच्यम् । तत्र स्मृतेः कारणान्तरासम्भ-वेन तत्त्वेऽपि प्रकृते प्रमासामग्रीसत्त्वेन वैषम्यात् ।

एवं प्रमाज्ञप्तिरपि विज्ञानज्ञापकसामग्रीत एव । नन्वेवं सति विज्ञानग्राहिसाक्षिमात्रग्राह्यत्वेन विज्ञानवदेव प्रमाणमप्रमाणं वेति संशयो न स्यादिति चेन्न । तादृक्प्रसंगस्य नैयायिकमतेऽपि तुल्य-त्वात् । तथाहि—सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति रीत्या धर्मिज्ञानस्य तत्तज्ज्ञानसमयस्फुरणस्यानुव्यवसायज्ञानस्य च नैयायिकैः स्वतःप्रामाण्यमभ्युपेयते । तत्र धर्मिज्ञानेऽनुव्यवसाये च तन्मतरीत्या स्फुरत्यपि बौद्धानामप्रमाणमेवेति विपर्यासो दृश्यते । एवं स्वतःप्रमाणत्वेनोरीकृताऽनुमित्यादौ लौकायतिकानां विप्रति-पत्तिर्दृश्यते । तत्र प्रतिभासपुष्कलकारणे सत्यपि प्रतिबन्धकादिस-मवधानेन यथोपपत्तिस्तथैव प्रकृतेऽपि समाधानं सम्भवत्येव । न च तर्हि शुक्तिरजतादिबुद्धिष्वपि प्रामाण्यग्रहणप्रसंगः, तथा प्रसङ्गेऽपि कारणदोषावगमबाधबोधाभ्यां तदपनयनात् । न च तर्हि अत्रापि दोषबाधाभावज्ञानस्य हेतुत्वापत्त्या परतः प्रामाण्यमेवेति वाच्यम् । दोषबाधबोधयोरनुदयमात्रे प्रामाण्यस्फुरणाङ्गीकारेण

तद्दोषात् । तदभावावगमस्यापि प्रामाण्यस्फुरणहेतुत्वे तस्यापि प्रामाण्यावगमाय तत्तदभावावगमान्तराणामप्यपेक्षणीयत्वेनानवस्था।

प्रामाण्यपरतस्त्वानुमानमपि स्वप्रकाशत्वेनाभिमतेषु धर्मिज्ञानानुव्यवसायादिषु व्यभिचारित्वादकिञ्चित्करतरम् । न चैतत्सर्वमनभ्युपगमपराहतम्; वार्तिकतात्पर्ये प्रमाणतोऽर्थप्रतिपत्ताविति भाष्यव्याख्यानावसरे वाचस्पतिमिश्रैरुक्तत्वात् । तथाहि–विमतं ज्ञानमर्थाव्यभिचारि, समर्थप्रवृत्त्युत्पादकत्वात् । यदि पुनरेवं नाभविष्यन्न समर्थां प्रवृत्तिमकरिष्यत्, यथा प्रमाणाभासमिति व्यतिरेकि, अन्वयव्यतिरेकि वा, अनुमानस्य स्वतःप्रमाणतयाऽन्वयस्यापि सम्भवात्। तथानुमानस्य तु परितो निरस्तसमस्तविभ्रमाशङ्कस्य स्वत एव प्रामाण्यम्, अनुमेयाव्यभिचारिलिङ्गसमत्वात् । एतेनोपमानं व्याख्यातमित्यादिना ।

प्रमात्वं विज्ञानग्राहकसामग्रीमात्रग्राह्यम् अप्रमामात्रवृत्तित्वानधिकरणत्वे सति ज्ञानैकवृत्तिजातित्वात्, ज्ञानत्ववत् ।

ननु प्रमात्वं न जातिः सम्भवति, साक्षात्कारित्वेन तस्य परापरभावासम्भवात् । प्रमात्वस्य साक्षात्कारित्वव्याप्यत्वे तद्रहितेषु परोक्षेषु अनुमानादिषु प्रमात्वाभावप्रसंगः । यदि च साक्षात्कारित्वं प्रमात्वावान्तरजातिभेदस्तर्हि प्रमात्वरहितेषु विभ्रमेषु साक्षात्कारित्वं न स्यात् । तदेव प्रमात्वस्य परत्वं सम्भवति । न चापरोक्षभ्रमेषु साक्षात्कारित्वं नास्ति । तस्मात्परापरभावशून्ययोरेकत्र वृत्तौ साङ्कर्येण प्रमात्वं न जातिः । प्रमात्वं यदि जातिस्तदा सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति परिभाषैव परिलुप्येतेदं रजतमित्येकस्यैव ज्ञानस्य धर्मिणि प्रमात्वमितरांशेऽप्रमात्वमिति जातिसाङ्कर्यप्रसंग इति चेन्नैवम् । साक्षात्कारित्वस्य रजतादिविभ्रमावृत्तित्वात् । न च कथं तर्हि साक्षात्कारित्वव्यवहारः, इन्द्रियसम्प्रयोगजन्यतोपाधिमात्रेण तद्व्यवहारोपपत्तेः । धर्म्यंशे प्रमात्वव्यवहारो-

ऽन्यत्राधितानुभूतित्वोपाधिनिबन्धनतयाऽप्युपद्यते । न चैवं तर्हि सर्वत्रैवोपाधिहेतुक एवास्तु प्रमात्वव्यवहारः, किं जातिकल्पनयेति वाच्यम् । गौर्गौरिति व्यवहारस्येव प्रमाप्रमेत्यबाधितव्यवहारस्य जातिमन्तरानुपपत्तेः । उपाधिमादायजातिप्रत्याख्यानस्य गोत्वादिष्वपि तुल्यत्वात् । तस्माद्यत्र जातिबाधको न प्रसरति तत्र जातिरन्यत्रोपाधिरित्येव विभागो युक्तः । तस्मान्न पूर्वोक्तहेतोर्विशेष्यासिद्धिः । विपक्षे चानवस्थाप्रसंगो बाधकस्तर्कः । न च निलीनस्यैव प्रमाणस्यार्थेव्यवहारजनकत्वोपपत्त्मा नानवस्थेति वाच्यम् । तथात्वनिश्चायकप्रमाणानुदये तदस्तित्वस्यैव निश्चेतुमशक्यत्वात् । ननु ज्ञानस्य स्वतः स्फुरणं भवतु, तत्प्रामाण्यं तद्गतगुणत्वादिवदन्यत्त एवावगम्यतामिति चेन्न । तस्यादित एव प्रमाणत्वेनास्फुरणे तद्विषये निःशङ्कप्रवृत्त्यनुपपत्तेः । नहि ज्ञानमात्रेण प्रवृत्तिः संभवति, मरुमरीचिकादौ सत्यपि विज्ञाने तदप्रामाण्यनिश्चये प्रवृत्त्यदर्शनात् ।

न चाप्रामाण्यास्फुरणे प्रामाण्यप्रत्ययमन्तराऽपि ज्ञानमात्रात्कुतो न प्रवृत्तिरिति वाच्यम् । प्रामाण्याप्रामाण्ययोरुभयोरस्फुरणे संशयात्प्रवृत्त्यनुपपत्तेः । अस्ति चानभ्यासदशायां नववनस्थलीस्थितेषु फलितसहकारादिषु तत्फलप्रेप्सोर्निःशङ्कप्रवृत्तिः । पारलौकिकफलसाधनेषु निःशङ्कप्रवृत्तिर्नैयायिकादिभिः प्रामाण्यनिश्चयपरतन्त्रैवोपेयते । न च कृष्यादौ संशयेऽपि प्रवृत्तिर्भवतीति वाच्यम्; तत्र निःशङ्कप्रवृत्तेरभावात् । तस्मात् प्रामाण्यनिश्चयाधीनैव प्रवृत्तिरुपेतव्याऽन्यथा । प्रामाण्यानिश्चयान्निवृत्तिरपि सम्भवत्येव । तस्मात्पूर्वोक्तप्रवृत्तिसिद्धये स्वत एव प्रामाण्यं प्रमाणानामनिच्छताप्यङ्गीकार्यम् । अत एव फलेऽपि स्वतस्त्वमेव । ज्ञेयाभिव्यक्तिलक्षणस्य फलस्य ज्ञानमात्रादेव सिद्धेः ।

न्यायकणिकायां वाचस्पतिमिश्रास्तु—"ननु बाधकारणदोषाभ्यामप्रामाण्यज्ञानात् तदभावगृहापेक्षप्रामाण्यनिश्चयेन स्वतः-

प्रामाण्यमिति चेन्न । एकहेतुत्वकल्पनायां कार्योत्पत्तावनेकहेतुत्वकल्पनानुपपत्तेः । बाधस्य कारणदोषग्रहणस्य चाप्रामाण्यनिश्चयहेतुभावमात्रेण प्रामाण्योपहन्तृत्वेन तदभावे बोधमात्रादेव प्रामाण्योपपत्तौ न तदभावोऽपेक्षणीयः । स च सत्यामाशङ्कायाम्, सा च यादृशे विषये दृष्टचरी,तादृशे एव न सर्वत्र । तस्मात्स्वत एव प्रमाणानां प्रामाण्यम् , वह्नेर्दहनसामर्थ्यवत् । तदेव चोक्तम्—

'स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम् ।'

इत्यादिना भट्टपादैः ।"

नन्वव्यभिचाराग्रहे ज्ञानमात्रादनाश्वासप्रसंग इति चेत्; कोऽयमनाश्वासो नाम ? संशयः, आहोस्विद् अज्ञानम् ? न चरमः; बोधस्यैव ज्ञानत्वात् । न प्रथमः; विशेषस्मृत्यपेक्षविमर्शं त्रिकारणं पञ्चकारणं वा संशयं रोचयन्ते—'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्धिव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय' इति तद्विशेषज्ञाः । न चागृहीते विशेषे न स्मरणसंभवः, न वा संशयात्मैत द्ग्रहणं स्मृतिहेतुः, स्मृतौ सत्यां तद्भावात् , तस्मिंश्च स्मृत्युपपत्तेरन्योन्याश्रयप्रसंगात् । संस्कारजत्वेऽपि प्रसंगतादवस्थ्यात् । अनादितायाञ्च गत्यन्तरसम्भवेऽनाश्रयणात् । तस्मान्नाव्यभिचारनिश्चयो ज्ञानस्य स्वार्थनिश्चयनिमित्तम् , तस्योत्पत्तौ तदपेक्षत्वात् । यत्स्वरूपोपत्तौ यदपेक्ष्यते, न तत्तस्य हेतुः, यथाऽनुमेयविज्ञानं लिंगविज्ञानस्य । न चासिद्धताहेतुः, स्वार्थनिश्चयापेक्षम् तदव्यभिचारविज्ञानमिति कार्यात्प्राग्भावित्वे कारणत्वं व्याप्तम्, तद्विपक्षविरुद्धोपलब्ध्या व्यावर्तमानं कारणत्वमपि व्यावर्तयति इति प्रतिबन्धसिद्धिः । अर्थप्रापणशक्तिरपि तस्यार्थप्रदर्शनान्नान्या । नहि ज्ञानमात्मीयहस्ते वस्तूपनयति, अपि तु तत्र प्रवर्तयति ज्ञातारम् । प्रवर्तनमपि तस्य न वस्तुतत्त्वोपदर्शनादन्यत् । अर्थस्य वस्तुतत्त्वमपि न स्वरूपादन्यत् । तच्चास्य रूपमनुभवः, स्वभावत

एवानुभवति न पुनरव्यभिचाराद्यपेक्षते। तदिदमेवानुभवस्याऽर्थे स्वतःप्रामाण्यम्।

यदनुभूयमानाद्रूपात् अर्थस्यान्यथात्वं न तदनुभवत्यनुभवो रजतभ्रमेण तदन्यथात्वग्रहणे रजतार्थिनस्तत्राप्रवृत्ते र्बाधकानुपपत्तेश्च। ततश्च ज्ञानान्तरावसेयमन्यथात्वं तेन तत्रान्यदपेक्षतेइति तदेवास्य परतोऽप्रामाण्यम्। यत्पुनरस्य तत्त्वाववोधरूपत्वं विज्ञानस्य तदपि तद्ग्राहिणः प्रत्ययान्तरान्मानसादानुमानिकाद्वावगम्यमानं स्वत इत्युच्यते, तत्स्वरूपग्राहिणः प्रत्ययात्प्रत्ययान्तरानपेक्षणात्। न चास्य वाधकाशङ्कायामप्रामाण्यमाशङ्कनीयम्; बाधानर्हे तदाशङ्कानुपपत्तेः।

नैयायिकादयस्तु—ज्ञानञ्च स्वविषयोचितव्यवहारप्रवर्तनेऽव्यभिचारितामपेक्षते। न हि विज्ञानं विज्ञानमित्येव व्यवहारं प्रवर्तयति, मिथ्याज्ञानादपि तत्प्रसङ्गात्। तस्मान्मिथ्याज्ञानव्यावृत्तमस्य संवादकत्वमर्थक्रियाप्रापणसामर्थ्यमव्यभिचारितालक्षणं प्रेक्षावत्प्रवृत्त्यङ्गमिति निगदन्ति।

तच्च द्विविधम्—प्रत्यक्षज्ञानमर्थक्रियासाधननिर्भासकं प्रमाणमभ्यासदशापन्नं तद्विपरीतञ्च। तत्र विपरीतस्यार्थक्रियानिर्माणविज्ञानात्प्रामाण्यमभ्युपगन्तव्यम्। तदर्थनान्तरीयकार्थान्तरदर्शनादभ्यासदशापन्नात् यथारादवह्निविज्ञानस्य वह्निकिंशुकनिचयसंशयेन निरोहितप्रामाण्यस्य धूमादिदर्शनात्प्रामाण्यनिश्चयः अर्थक्रियानिर्भासस्य ज्ञानस्यागृहीतप्रामाण्यस्य न प्रवर्तकविज्ञानप्रामाण्यनिश्चायकत्वम्। गृहीतप्रामाण्यस्य वा तन्निश्चायकत्वेऽनवस्थाप्रसङ्ग इति चेन्न। अर्थक्रियानिर्भासस्य ज्ञानस्य स्वरूपेणेष्यमाणतया फलत्वेनाप्रवर्तकतया प्रमाणलक्षणायोगितया व्यभिचारनिश्चस्यानुपयोगात् तद्रूपस्य स्वसंवेदनासिद्धस्य शङ्काऽनास्पदत्वात्। तदाहुः—

"अर्थक्रिया सुखाद्यात्मज्ञानमेव तथाविधम् ।
प्रमाणलक्षणायोगि स्वतोऽधिगतशक्तिकम् ॥"

न च यद्यर्थक्रियानिर्भासाद् विज्ञानाद् व्यभिचारनिश्चयो निश्चिताव्यभिचारात् प्रवर्तकविज्ञानाच्चार्थक्रियानिर्भासविज्ञानमित्यन्योन्याश्रयतेति वाच्यम्; प्रेक्षावत्प्रवृत्तिद्वैविध्येन तददोषात् । प्रथमा प्रवर्तकविज्ञानपरीक्षार्था, अपरा परीक्षितेन साधननिर्भासस्य विज्ञानस्य तज्जातीयाद्विज्ञानादर्थक्रियाप्राप्त्यर्था । यथा कृषीवलस्य कर्परस्थितायां मृत्तिकायां कृषिपरिकर्मितायां बीजावपनलक्षणा प्रवृत्तिराद्या बीजपरीक्षार्था, स तु तत्राङ्कुरोत्पादादवगतबीजतत्त्वः सस्याधिगमकाम्यया द्वितीयां प्रवृत्तिमारभते—परिकर्मितायां भुवि तज्जातीयबीजावपनस्वरूपाम् । तथेयमपि प्रवृत्तिद्वयीति नान्योन्याश्रयः । न चात्र प्रेक्षावत्त्वव्याघातः; परीक्षोपाये प्रवर्तमानस्यानुपाये संदिग्धोपाये वाऽप्रवृत्तेः । प्रवर्ततां वोपायसंदेहादपि । तथापि न प्रेक्षावत्त्वव्याघातः, अर्थसंशयस्य प्रेक्षावत्प्रवृत्त्यङ्गत्वादनर्थसंशयस्य चाप्रवृत्त्यङ्गत्वात् ।

अभ्यासदशापन्नस्य तु प्रत्यक्षस्य प्रापितार्थक्रियाज्ञानसाधर्म्यादनुमानात् प्रामाण्यविनिश्चयः । अनुमानस्य तु नान्तरीयकार्थदर्शनजन्यतया निश्चिताव्यभिचारस्य स्वत एव प्रामाण्यनिश्चयः । प्रामाण्यपरतस्त्वसमर्थने वार्तिकतात्पर्ये—'अर्थप्रतीत्यधीना तु प्रवृत्तिर्नार्थावधारणाधीना, अर्थसन्देहादपि प्रेक्षावतां प्रवृत्तिः ।' नो खलूपायताविनिश्चयेनापि प्रवर्त्तमानाऽनागतफले न संदिहते । तदमी संदिहाना अपि प्रवर्तमाना प्रवृत्तिसामर्थ्यात् प्रमाणस्य सामर्थ्यं निश्चित्य तज्जातीयस्याभ्यासदशापन्नस्य प्रवृत्तिसामर्थ्यात् प्रागेव तज्जातीयत्वेन लिङ्गेन प्रामाण्यावधारणादर्थविनिश्चयेन प्रवर्तन्ते । एवञ्च दृष्टार्थमन्त्रायुर्वेदप्रामाण्यं प्रवृत्तिसामर्थ्येनावधार्य तज्जातीयस्यादृष्टार्थस्य वेदस्य विनापि प्रवृत्तिसामर्थ्यं प्रामाण्यावधारणमाप्तत्वेन निवेदयिष्यते ।

फलज्ञानं न परीक्ष्यते, पिपासोस्तोयज्ञानेन तत्र प्रवृत्तिर्भवति, प्रवृत्तस्य तदाप्तिः, आप्तस्य पानम्, पानेन पिपासोपशान्तिः। तावतैव तुष्टो भवति पिपासुः, न पिपासोपशान्ति परीक्षते, तस्य यादृशतादृशस्यापीष्टत्वादिति वाच्यम्। वाचस्पतिमिश्रास्तु–"फलज्ञानमपि अभ्यासदशापन्नतया तज्जातीयत्वेन लिङ्गेनावधारिताव्यभिचारमेव, एवं तत्पूर्वं तत्पूर्वतरं तत्पूर्वतमम्। न च सम्प्रतिपन्नस्य फलज्ञानस्य प्रामाण्यावधारणायेदानीमेव पूर्वस्य फलज्ञानस्य प्रामाण्यावधारणे सति अनवस्थेति वाच्यम्; पूर्वतरसाधारण्येन पूर्वतरस्य पूर्वमेवावधृतप्रमाण एव पूर्वतमत्वात् साधर्म्येण पूर्वतरस्य, तत्पूर्वसाधर्म्येण पूर्वतमस्य, इत्येतावतैव परिहारः।" तदेतदसङ्गतम्; अर्थक्रियानिर्भासस्य एव विज्ञानस्य विज्ञातस्यार्थाव्यभिचारस्य स्वार्थे विनिश्चायकत्वस्य दुर्धरत्वात्। तदेतदपि मीमांसकमतरीत्या वाचस्पतिमिश्रैः न्यायकणिकायां प्रपञ्चितम्। तथाहि--स्वप्ने कामुकस्य स्वोचितार्थक्रियासमर्थकामिनीविज्ञानं तदनन्तरं प्रवृत्तिविज्ञानमथ संभोगविज्ञानमनन्तरं सुखं चरमधातुविसर्गश्च। तत्राद्यकामिनीविज्ञानस्यास्तु प्रामाण्यम्, तत्रार्थक्रियानिर्भासस्य विज्ञानस्य सत्त्वात्। ततः परं तस्य भावात्, जागरे च तदर्थक्रियाकारिणः कामिनीरूपस्य वाधात्, सुखचरमधातुविसर्गयोश्च मनोमात्रयोनितया कामिन्यामसत्यामपि तज्ज्ञानमात्रादुत्पादनाज्जागरेऽनुवृत्ते रविरोधात्। अन्यथाकामिनीवस्तुसाध्याधरपल्लवादिनखक्षतादिवद्व्यावृत्तिप्रसङ्गादयमदोष इति चेन्न। प्रकृतेऽर्थक्रियानिर्भासस्य ज्ञानस्याव्यभिचारित्वाग्रहेणार्थक्रियाया अनिश्चयेन प्रवर्तकस्य ज्ञानस्यार्थक्रियासमर्थवस्तुपरिप्रापणलक्षणप्रामाण्यानिश्चये स्वप्नविज्ञानसाम्यात्। न चार्थक्रियानिर्भासं ज्ञानं स्वतःप्रमाणमर्थक्रियानिश्चयात्मकत्वात्। न च स्वप्नादौ प्रसङ्गः, तत्रावस्थान्तरे पुरुषान्तरे कालान्तरे वा बाधकोत्पादादप्रामा-

ण्यादिति तत्प्रवर्तकेष्वपि ज्ञानेषु समत्वादन्यत्राभिनिवेशात्। अव्यभिचारित्वं नाम ज्ञानस्यार्थेन सह। न च तदर्थग्रहणादृते शक्याध्यवसानम्, न खल्वगृहीतवह्निः धूमस्य तदव्यभिचारमवधारयितुमर्हति। न खल्वप्रमाणेनागृहीतप्रामाण्येन वा प्रमाणेन विषयीकृतो धूमकेतुर्धूमाव्यभिचारग्रहणाय कल्पते। तस्मादव्यभिचारग्रहणमन्तरेण नार्थग्रहणम्, न चार्थग्रहणमन्तरेणाव्यभिचारग्रहणमिति परस्पराश्रयता। तथा दृष्टसामर्थ्यसाधर्म्यानुमानेनाऽभ्यासदशापन्नप्रत्यक्षज्ञानानां स्वार्थाव्यभिचारग्रहणमपास्तम्।

यदपि चानुमानस्य स्वतःप्रामाण्यमुक्तम्, तस्मिन् दर्शने प्रत्यक्षस्य स्वार्थाव्यभिचारग्रहणादुक्तेन क्रमेण तत्पूर्वकत्वानुमानस्योदय एव दुर्घटः, कुतोऽस्य प्रामाण्यं कुतश्च स्वतस्त्वम्? परतस्त्वसाधकानुमानानां व्यभिचारश्च स्वतस्त्वाभिमतेषु प्रमाणेषु तथैवान्येषामपि स्वतस्त्वं किं न स्यादिति पर्यनुयोगापत्तेश्च। तस्मात्प्रमाणानां स्वत एव प्रमाणताऽभ्युपेतव्या। कानिचिद्विज्ञानानि स्वस्थेन्द्रियस्वान्तस्य पुंसः स्फीतालोकमध्यवर्तिप्रमेयविषयाणि, यत्र न मनागपि बाधा दृष्टचरी, कथं तत्र बाधाहेता प्रयत्नेनानुसरन्नपि नापादयत्यस्य बाधां, तदौत्सर्गिकमस्य प्रामाण्यमविहितमनपेक्षमवतिष्ठते, यदि पश्येत्ततस्तदपोहितमिति नान्यत्र तदुत्प्रेक्षितव्यम्। यदा यत्र निपुणेन प्रतिपत्त्रा प्रयत्नवताऽपि नापाद्यते, कारणदोषबाधादिकम्, तदा तत्र स्वाभाविकप्रामाण्यमविहितमनपेक्षमेवावतिष्ठते। यद्युपलभ्येत बाधादिकं तदा तदपोहितमिति नान्यत्र तदुत्प्रेक्षितव्यम्। तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता।

"अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते।
द्वावेव निन्दितौ लोके निराशङ्कातिशङ्किनौ॥

एवं त्रिचतुरज्ञानजन्मनो नाधिका मतिः ।
अर्थ्यते तावदेकं यः स्वतःप्रामाण्यमश्नुते ॥
उत्प्रेक्ष्यते हि यो मोहादज्ञातमपि बाधकम् ।
स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत् ॥"

अत्रेदमाकूतम्—नैयायिकादयस्तु वेदस्येश्वरप्रणीतत्वेनेश्वरस्य चाप्तत्वेन प्रामाण्यमभ्युपयान्ति, परमन्यैस्तु स्वातन्त्र्याद् वेदे प्रामाण्यमेव नास्तिइत्युच्यते । प्रत्यक्षाद्यगतार्थत्वात् स्वर्गयागादिसम्बन्धविषया चोदना बुद्धादिवाक्यवन्मृषा, आप्ताप्रणीतत्वेन बालोन्मत्तादिवाक्यवच्चाप्रामाण्यं वेदस्योच्यते । वाक्यत्वेनापि हेतुना पुरुषोक्तिवत् नराधीनप्रामाण्यायाश्चोदनाया अपि वक्तृगुणाधीनत्वेन प्रामाण्यं पुरुषदोषेण चाप्रामाण्यम् । प्रत्ययोत्पादकत्वेऽपि यथा बुद्धादिवाक्यानां प्रामाण्यं नास्ति, तथैव वेदवाक्यस्यापि प्रामाण्यं नास्तीति ।

स्वतोऽसतामसाध्यत्वेन द्वयमपि स्वत एवेति साङ्ख्याः । नैयायिकादयस्तु प्रामाण्याप्रामाण्ययोर्ज्ञानं साधारण्यान्न किञ्चित् निर्धारयितुं शक्नोतीति गुणवता दोषवता च कारणेनोत्पन्नस्य यथार्थस्वरूपं प्रामाण्यमयथार्थत्वरूपमप्रामाण्यञ्च निर्णीयते । प्रामाण्यमप्रामाण्यञ्च स्वत एवेति पक्षो न क्षोदक्षमः, विरोधात् । ज्ञानोत्पत्तिवेलायामेव प्रामाण्यमप्रामाण्यञ्च निर्णेतव्यम् । तच्चाशक्यम्; तद् द्वयमपि परत इत्यपि न सम्भवति; ज्ञानस्य स्वतो निःस्वभावत्वापत्तेः । अतः यथैकस्य ज्ञानस्य कारणान्तरानपेक्षस्य स्वत एव प्रामाण्यमप्रामाण्यञ्चात्यन्तविपरीतत्वात् न सम्भवति, तथैव ज्ञानस्य निःस्वभावत्वापत्त्या तद्द्वयमपि परत इति नोपपद्यते । एकस्य हि विरुद्धरूपासम्भवः । विज्ञानव्यक्तिभेदेन प्रामाण्याप्रामाण्यञ्चेत् तदा त्वविरोध एव । तथापि यदि ज्ञानत्वातिरिक्तं किञ्चिच्चिह्नं भवेत् तदा त्वीदृशं प्रमाणमीदृशमप्रमाणमिति

व्यवस्था सम्भवति, न तदभावेऽपि। तदधीननिरूपणत्वे तु प्रामाण्याप्रामाण्ये परतस्त्वमेव न स्वतस्त्वम्। अतो बौद्धैः प्रमाणानां स्वाभाविकमप्रमाणत्वम्परापेक्षञ्च प्रमाणत्वमुपेयते। अप्रामाण्यमवस्तुत्वात् न कारणदोषादिकमपेक्षते प्रामाण्यन्तु वस्तुत्वात् कारणगुणादिकमपेक्षत एव। यदि प्रामाण्यं स्वाभाविकमप्रामाण्यमेव परापेक्षं भवेत्, तदा तु स्वप्नादिबोधेऽपि प्रामाण्यमापत्स्यते। बौद्धपक्षे तु कारणाभावात् स्वप्नादिज्ञानस्य नास्ति प्रामाण्यम्। पक्षेऽस्मिन्न वस्तुनोऽप्रामाण्यस्य हेतुमत्त्वंप्रसङ्गोऽपि न भविष्यति। इन्द्रियादिगुणा प्रामाण्यस्य कारणम्। तदभावादप्रामाण्यम्। गुणाभावस्तु द्विधा भवति। शुक्ति रजतादिसंवेदने सत्त्वेऽपीन्द्रियाणां दुष्टत्वाद् दोषनिराकृतत्वात् गुणानामभावः। स्वप्नादिज्ञानहेतूनामिन्द्रियादीनामन्यतरस्याप्यभावात् आश्रयाभावाद् गुणाभावः। दोषनिराकृतगुणत्वेन शुक्तिरजतादिज्ञानस्या प्रामाण्यदर्शनात् दोषस्याप्रामाण्यकारणत्वभ्रम एव। विद्यमानेनार्थेनेन्द्रियाणां सन्निकर्षात् पुरुषस्य प्रत्यक्षबुद्धिर्जायते। धर्मस्य च भव्यत्वेनाविद्यमानत्वात् विद्यमानोपलम्भनस्य प्रत्यक्षस्य धर्मे न प्रामाण्यम्। चोदनायाः शब्दात्मकत्वात् शब्दस्य चात्यन्तासत्यप्यर्थे ऽतीतानागतादौ ज्ञानजनकत्वेन प्रामाण्याद्विद्यमाने ऽपि धर्मे शब्दस्य प्रामाण्यमव्याहतम्। द्रव्यगुणक्रियादीनां धर्मत्वं यद्यपि संस्थापितमेव, तथापि श्रेयःसाधनत्वेन रूपेण द्रव्यगुणादीनां धर्मता। तस्मान्नेन्द्रियगोचरो धर्मः। लोके प्रमाणान्तरदृष्टमेवार्थं शब्दो बोधयति। तथा चाधिगतगन्तृत्वेन स्मृतिवदप्रामाण्यमेव तस्य। यथा च सत्यपि ज्ञाने प्रतिभादेर्यथा प्रामाण्यं नास्ति, तथैवासम्भावितप्रमाणान्तरमूलकत्वेन वेदस्य नास्त्येव प्रामाण्यम्।

वस्तुतो दोषाद्गुणाभावो विज्ञायते। गुणाभावाच्च प्रामाण्यमनवगम्यमानं स्वाभाविकस्याप्रामाण्यस्य नापवादकं भवति। तथा चानपोहिता प्रामणतैवावतिष्ठते। तस्माद्धेतुशुद्धिरेव

ज्ञानप्रामाण्यकारणम्। हेतुशुद्धिविरहेण स्वाभाविकमप्रामाण्यम्। अन्वयव्यतिरेकाभ्यां दोषस्याप्रामाण्यकारणत्वं नास्ति। कारणाभावहेतुकेऽज्ञानेऽप्रामाण्यस्य दोषानधीनत्वात्, संशयाज्ञानविपर्ययैरप्रामाण्यस्य त्रैविध्याभ्युपगमात्। एवं ज्ञानस्य गुणापेक्षत्वेन प्रामाण्ये पुरुषशुद्ध्यधीनमेव शब्दस्य प्रामाण्यमायाति। वेदस्यापौरुषेयत्वे निराश्रयत्वेन शुद्ध्यभावः। पौरुषेयत्वे चातीन्द्रियार्थे पुरुषस्य शुद्ध्यसम्भवः। ततो वेदस्याप्रामाण्यमेव। स्वतो द्वयमित्यस्य पक्षस्य साङ्कर्यादेव प्रामाण्यानिर्णयादप्रामाण्यमेव। परतो द्वयमित्यत्रापि गुणाभावादेवाप्रामाण्यम्।

मीमांसकास्तु सर्वप्रमाणानां स्वत एव प्रामाण्यमभ्युपगच्छन्ति। 'नासतो विद्यते भावः' इति रीत्या स्वतोऽसतः साधनसहस्रैरपि सत्त्वासम्भवात्। तथा च यदि ज्ञानस्य स्वविषयतथात्वावबोधने शक्तिर्न भवेत्तदा नान्येनापि तत्संभवः। तथात्वे च कस्यचिदर्थावधारणासम्भवेन जगदान्ध्यप्रसङ्गम्। यदुच्यते-गुणावधारणात्प्रामाण्यावधारणमिति। तन्न; गुणावधारणस्यापि अन्यायत्तत्वात्, तदनुपलम्भाच्च। न च वैमल्यमेव गुण इति वाच्यम्; तस्य दोषाभावरूपत्वात्, तस्य चापौरुषेये वेदेऽपि सम्भवाच्च। तथा च गुणाधीनेऽपि प्रामाण्ये न क्षतिः।

ननु गुणनिमित्तमेव ज्ञानस्य यथार्थविषयत्वमिति कारणभूतगुणावगमेन विषयस्य तथात्वमवगम्यते। ज्ञानस्य विषयतथात्वमेव हि प्रामाण्यमिति चेन्न। गुणनिमित्तस्य यथार्थत्वे गुणरहिताद्दोषसहिताच्च चक्षुरादेः उपजाते पीतशङ्खादिज्ञाने शङ्खांशेऽपि अयथार्थत्वापातात्। न चेष्टापत्तिः; शङ्खांशे बाधाभावेन यथार्थत्वाभ्युपगमात्। यदि च स्वकारणनिमित्तमेव ज्ञानस्य यथार्थत्वं तद्दोषनिमित्तञ्च ज्ञानस्यायथार्थत्वम्; तदा तु पीतशङ्खादिज्ञानस्य स्वकारणतः सत्यविषयत्वम्, तद्दोषतश्चासत्यविषयत्वमित्यदोषः।

वस्तुतस्तु सर्वेऽपि भावाः स्वरूपप्राप्त्यै स्वहेतुमपेक्षन्ते। घटो मृच्चक्रादिकं स्वरूपावाप्त्या एवापेक्षते, नोदकाहरणादौ। तथैव

ज्ञानमपि स्वोद्भूत्यै एव गुणवदितरद्वा हेतुमपेक्षते, न तु स्वकार्य-विषयतथात्वावधारणे। यदि ज्ञानमुपजातमपि स्वविषयतथात्व-निर्धारणाय गुणावधारणमपेक्षेत, तदा तस्यापि प्रमाणान्तरापेक्षा-पातः। गुणावधारणस्य प्रामाण्येऽनिर्धारिते संदिग्धप्रामाण्यस्य तस्यासत्समत्वात्। तत्प्रामाण्यनिर्धारकस्य ज्ञानस्याप्येवं स्वप्रामाण्याय प्रमाणान्तरापेक्षेतयानवस्थैव स्यात्। स्वतःप्रमाणत्वे नैवं दोषः। न च स्वतःप्रामाण्यपक्षेऽप्यपवादकदोषाभावग्रहणे भविष्यत्येवानवस्थेति वाच्यम्। ज्ञायमानानामेव दोषाणां प्रामाण्यविघातकत्वेन तदज्ञानादेव प्रामाण्यापवादकस्य मिथ्यात्वस्य निवृत्त्या तदर्थं दोषाभावस्यानपेक्षणात् तदज्ञानस्य चायत्नसिद्धत्वाद् बाधकज्ञानादिभिरवगतेनाप्रामाण्येन तदपोद्यते। तदुक्तम्—

'तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता।

अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते ॥"

ननु अप्रामाण्यमवस्तुत्वान्न दोषजन्यमिति चेन्न। संशयविपर्य्ययाज्ञानभेदेनाप्रामाण्यस्य त्रैविध्येनाद्ययोर्द्वयोरपि वस्तुरूपत्वात्। तथा च दोषान्वयव्यतिरेकानुविधानात् दोषनिमित्तमेव ज्ञानस्यायथार्थत्वम्। अर्थान्यथात्वज्ञानेन दोषेण वा तथात्वावबोधकत्वरूपं ज्ञानस्य स्वतःप्राप्तं प्रामाण्यमपोद्यते। अज्ञाने तु दोषाणां व्यापारो नापेक्षितः। ज्ञानकारणाभावादेव बौद्धानामिवास्माकमपि तत्सिद्धेः।

ननु प्रामाण्यवदप्रामाण्यस्यापि परतस्त्वे कथं नानवस्थेति चेन्न। गुणज्ञानवत् दोषेषु तदप्रसङ्गात्। न परायत्तत्वमात्रेणानवस्था भवति, सजातीयापेक्षायामेव तत्प्रसङ्गात्। यदि प्रमाणान्तरायत्तप्रामाण्यवत् अप्रमाणान्तरायत्तमप्रामाण्यं स्यात्, तदा स्यादेवानवस्था। न चाप्रामाण्यमप्रमाणान्तरापेक्षं प्रमाणभूतार्थान्यथात्वदोषज्ञानाधीनत्वात्। तस्य प्रामाण्यञ्च स्वत एवेति क्वाऽनवस्था? यत्र शुक्तिरजतादौ नेदं रजतमित्यर्थान्यथात्वज्ञानं जायते, तत्र त्वर्थान्यथात्वरूपाऽप्रमाणता शीघ्रगम्यैवेति नानवस्थाशङ्काऽ-

पि, तदपबाधात्मनस्तस्य तद्बाधमन्तरानुत्पत्तेः। पूर्वं तु परस्याजातत्वात्तदबाधित्वैव जायते। तदुक्तम्—

"पूर्वं परमजातत्वादबाधित्वैन जायते।
परस्यानन्यथोत्पादान्न त्वबाधेन सम्भवः॥"

एतेन रजतज्ञानस्य ज्यायसः कनीयसा नेदं रजतमिति ज्ञानेन कथं बाधः, ज्यायसा कनीयस एव बाधौचित्यादित्यपास्तम्।

अनपेक्षितस्य ज्यायस्त्वं बाध्यत्वे हेतुर्न बाधकत्वे इत्युक्तमेव। पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम्।

"अन्योऽन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्।"

ततश्चात्र पूर्वस्य निरपेक्षत्वेऽपि पूर्वाबाधेनोत्पत्तिमेवानासादयतोत्तरेणेत्युक्तावस्थायामेवार्थान्यथात्वरूपाप्रामाण्यबोधनात् लाघवमेव।

नन्वेवं समानविषयेणार्थान्यथात्वज्ञानेन पूर्वस्य बाधेऽपि दोषज्ञानेन तु भिन्नविषयेण कथं पीतशङ्खज्ञानं बाध्यते ? यतोऽत्र पीतशङ्खज्ञानं शङ्खे पीतिमानमवगमयति, दोषज्ञानन्तु नेत्रे पित्तदोषमिति वाच्यम्। दुष्टकारणबोधे विषयभेदेन तादृशलाघवाभावेऽपि कारणदोषावगमप्रणाल्याऽऽर्थिकतुल्यताप्राप्त्या गोदोहनेन चमसस्येव बाधोपपत्तेः। यथा 'गोदोहनेन पशुकामस्य प्रणयेत्' इति पुरुषार्थेनापि गोदोहनेन क्रत्वर्थस्यापि चमसस्यार्थिकतुल्यविषयतया भवति बाधः, द्वयोरपि प्रणयनद्वारत्वात। गोदोहनेन तत्साधने चमसस्यार्थान्निवृत्तिर्भवति, एवमत्राऽपि। यद्यपि पित्तज्ञानं पित्तं गृह्णाति, पित्तञ्च श्वेते पित्तभ्रमस्य कारणतयाऽवगते चक्षुषि दृश्यमानं स्वकार्यस्य पित्तज्ञानस्य भ्रान्तत्वमवगमयति। भ्रान्तत्वेन चार्थान्यथात्वमिति बाधसिद्धिः। तथापि नाऽयमुत्सर्गो यदाऽऽद्यस्य द्वितीयेन बाधः। किन्तु द्वितीये बाधज्ञाने यदि तृतीयं बाधकज्ञानं दोषान्तरज्ञानञ्च न भवेत्, तदैवैषा गतिः। तदुद्भवे तु द्वितीयस्य मिथ्यात्वादाद्यस्यैव तद्बाधकत्वेन प्रामाण्यम्।

न चैवं तृतीयज्ञानाधीनमाद्यस्य प्रामाण्यमिति परायत्तमेव प्रामाण्यमिति वाच्यम्। तस्योत्पत्तित एवार्थमवबोधयतः स्वत एव

प्रामाण्यात्। द्वितीयेन दोषज्ञानेन तदपवादः प्रसक्तः। तृतीयेन द्वितीये बाधिते सति अज्ञातदोषत्वात् अनपवाद एव।

ननु यथाऽऽद्यस्य ज्ञानस्य द्वितीयेन दोषोऽवगतस्तस्यापि तृतीयेन, तथा तृतीयस्याप्यन्येन दोषाऽवगमसंभवान्न क्वचिदाश्वास इति चेन्न। भावानवबोधात्। तथाहि—यदा जाग्रद्दशायां स्वस्थेन्द्रियमनस्कस्य स्फीतप्रकाशमध्यवर्तिसन्निहितघटज्ञाने लोकप्रसिद्धमिथ्यात्वहेतवो दोषा नानुभूयन्ते, तदा दोषाशङ्काया अभावात् अप्रामाण्यशङ्काऽपि न भवत्येव। यादृग्विधेषु हि अप्रामाण्यसंभवः, तत्रैव दोषाशङ्का, न सर्वत्र।

न हि ज्ञानत्वमात्रेण संशयः, तस्य साधारणधर्मादिनिश्चयाधीनत्वात्। तस्मात् अवश्यं कानिचित् ज्ञानानि अप्रमाणान्येवोत्पद्यन्ते, यत्र दूरत्वादिदोषसम्भवादप्रामाण्यशङ्का, तत्रापि प्रत्यासत्तिगमनादिनाऽन्यतरपदार्थनिर्णयात् नातिदूरगमनम्। तृतीयज्ञाने यदि दोषो न संभावितः, ततस्तदवधिरेव निर्णयः। यदि सम्भावितस्ततस्तन्निराकरणप्रयत्नेन चतुर्थज्ञानावसानो निर्णयः, नाधिकज्ञानापेक्षा।

तृतीयेन चतुर्थेन वा द्वितीयस्य तृतीयस्य वा बाधे आद्यस्य द्वितीयस्य वा यस्यैव प्रामाण्यं समर्थ्यते, तस्य स्वाभाविकं प्रामाण्यमनपोहितं भवति। इतरदपवादादप्रमाणमिति नानवस्था। तदुक्तम्—

"एवं त्रिचतुरज्ञानजन्मनो नाधिका मतिः।
प्रार्थ्यते तावतैवैकं स्वतःप्रामाण्यमश्नुते॥"

तत्र शब्दे वक्त्रधीन एव दोषोद्भवः, क्वचिद् गुणवद्वक्तृकत्वेन दोषाभावश्च। वेदस्य चापौरुषेयत्वात् पुरुषाभावेन निराश्रयत्वात् दोषाभावेनाऽनपोहितं स्वतःप्रामाण्यमेव।

न च वक्तृगुणान्वयव्यतिरेकानुविधायित्वात् शब्दस्य गुणाधीनमेव प्रामाण्यमिति तदभावेन वेदस्याप्रामाण्यमेवेति वाच्यम्। प्रमाणानां परायत्तप्रामाण्यस्य निराकृतत्वेन प्रामाण्यस्वतस्त्वसाधनात् अन्वयव्यतिरेकयोश्च दोषाभावेन गतार्थत्वाच्च प्रमाणभूतपौरुषेय-

वचस्सु न केवलं यथागुणा दृष्टा एवं दोषाभावोऽपि दृष्टः। दोषाभावनिबन्धनत्वेन प्रामाणस्य च वेदेऽपि सुलभत्वात्।

न चैवमपि प्रामाण्यपरतस्त्वमेवायातम्; तस्यापवादाभाव एवोपयोगित्वात्। गुणेभ्यो दोषाभावः, दोषाभावादप्रामाण्यद्वयाभावः, ततश्चानपोहितं स्वतःप्रामाण्यमेव तिष्ठति। यत्र साक्षाद्विपरीतबाधकज्ञानादर्थान्यथात्वमवगम्यते, यत्र च दोषज्ञानेनोभयत्रापि ज्ञानस्यायथार्थत्वे दोषा एव कारणम्, दोषाभावेन तद्द्वयासत्त्वेनोत्सर्गस्यानपवाद एव सिद्ध्यति। अपवादाभावे प्रत्ययोत्पत्तिहेतुत्वात् प्रत्यक्षादिवत् पौरुषेयवाक्यस्यापि प्रामाण्यं प्राप्तम्, तन्नापनीयते। एवं पौरुषेयवाक्यस्यापि स्वतःप्रामाण्ये सिद्धेऽपौरुषेये वेदे तु सुतरां स्वतःप्रामाण्यम्।

ननु दोषाभावस्य गुणाधीनत्वे पुनरपि सैव स्थितिरिति चेन्न। प्रामाण्यावधारणे गुणानां ज्ञायमानत्वेन कारणत्वेऽनवस्थासम्भवेऽपि सत्तामात्रेणापकारित्वेन तदसम्भवात्। गुणनिराकृतदोषा औत्सर्गिकं प्रामाण्यं नोपघ्नन्तीति क्वानवस्थावकाशः? वेदे तु वक्त्रभावादपवादनिर्मुक्तिस्ततोऽपि लघीयसी, तेन तत्रापवादशङ्काऽपि नोदेति।

एवं लोकेऽपि शब्दप्रामाण्यस्य वक्त्रपेक्षाभावेन वेदप्रामाण्यसिद्ध्यर्थं कर्तृकल्पनमनावश्यकम्। शाक्यादिवत् अप्रामाण्ये कल्पयितव्ये एव कर्तृकल्पना युक्ता। यच्चोक्तमाप्तप्रणीतत्वेन, बालोन्मत्तादिवाक्यवदप्रामाण्यमेवेति चेन्न। प्रामाण्यस्वतस्त्वसिद्धेः। न च तर्हि पौरुषेयेऽपि वाक्ये प्रमाणान्तरापेक्षाऽनपेक्षणीयेति वाच्यम्; तथात्वेऽप्रमाणमूलतया दुष्टमूलत्वेन प्रामाण्यापवादापातात्। वेदे त्वपौरुषेयत्वेनाप्रमाणमूलत्वाशङ्काया अभावेन तदयोगात्। वेदे प्रमाणान्तरमूलाभावो भूषणमेव, न दूषणम्। प्रमाणान्तरविषयत्वेनानधीगतगन्तृत्वाभावेनानुवादकत्वापत्तेः।

ननु प्रत्यक्षादीनां पौरुषेयवाक्यानाञ्च प्रमाणान्तरसंभवादनिबन्धनमेव प्रामाण्यम्; अतो वेदस्यापि तथात्वमेवेति चेन्न। प्रमाणान्तरसंगतिरूपसंवादस्य प्रामाण्यविरोधित्वेन तद्धेतुत्वानुपपत्तेः। यत्रैकस्मिन्नर्थेऽनेकप्रमाणसन्निपातस्तत्र तेषामन्योन्यनिरपेक्षार्थावबोधहेतुत्वे न तुल्यानामेव प्रामाण्यम्, न समुच्चितानाम्। अतः प्रमाणान्तरमूलत्वेनानुवादत्वापत्त्या नो संवादाधीनं प्रामाण्यम्।

ननु चैकमेव वस्तु दूरात् दृष्ट्वाऽपि पुनः प्रमित्सयैव प्रत्यासीदन्तो दृश्यन्ते। तदेतत्पूर्वस्य नैरपेक्ष्ये नोपपद्यते। अतः संवादापेक्षमेव प्रामाण्यमिति चेन्न। अप्रमितविशेषप्रमित्सयैव प्रत्यासत्त्युपपत्तेः। तदुक्तम्—

"यत्रापि स्यात्परिच्छेदः प्रमाणैरुत्तरैः पुनः।
नूनं तत्रापि पूर्वेण सोऽर्थो नावधृतस्तथा ॥"

यदि हि उत्तरोत्तरप्रामाणसंवादेन पूर्वपूर्वप्रमाणानां प्रामाण्यं भवेत्, तदानवस्थानात् न क्वचिद् व्यवस्था स्यात्।

ननु च विषयज्ञानस्यार्थक्रियाज्ञानाधीनं प्रामाण्यम्; तच्च स्वत एवेति नानवस्था। तदुक्तं धर्मकीर्तिना—

"प्रमाणमविसंवादिज्ञानमर्थक्रिया स्थितिः।"

नैयायिकैरप्युक्तम्—"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्।" फलज्ञानं न परीक्ष्यते, पिपासोस्तोयज्ञानेन प्रवृत्तिः, ततस्तोयप्राप्तिः, प्राप्तस्य पानम्, पानेन पिपासोपशान्तिः। सा च न परीक्ष्येत, अपरीक्षितस्यापि फलस्येष्टत्वादिति चेन्न। विषयज्ञानार्थक्रियाज्ञानयोर्विशेषाभावात्। तथा च यद्येकस्य स्वतःप्रामाण्यं तर्हि विषयज्ञानस्य स्वतःप्रामाण्ये कः प्रद्वेषः? किञ्च यदि संवादाधीनं प्रामाण्यं भवेत्, तदा श्रोत्रजन्यबुद्धेरप्रामाण्यमेव स्यात्, प्रमाणान्तरासङ्गतेः। यद्यन्येन

श्रोत्रजन्यज्ञानेन संवादासिद्धिः, तर्हि तादृशसंवादस्तु वेदेऽपि सम्भवत्येव, शतकृत्वः समुच्चारणजन्यनानाज्ञानानां संवादसंभवात्। साधनान्तरजन्यबुद्धिसंवादभावस्तूभयत्र समान एव। तथा च गुणसंवादार्थक्रियाज्ञानादीनामपेक्षाभावात् स्वत एव प्रामाण्यं ज्ञानस्य।

यत्तूक्तं क्वचिदाप्तप्रणीतस्य वाक्यस्य प्रामाण्यं न दृष्टमिति वेदस्यापि तत्कथमिति। तन्न; अनुमानसाध्ये विषय एव दृष्टान्तापेक्षत्वेऽपि प्रामाण्यस्यानुमानानपेक्षत्वेन दृष्टान्तानपेक्षणात्। प्रामाण्यस्यानुमानापेक्षत्वे तस्याप्येवं तस्याऽप्येवमित्यनवस्था प्रसज्येत। प्रामाण्यस्यानुमानसाध्यत्वे सर्वेषामपि प्रमाणानां प्रामाण्यस्य तथात्वापत्तेश्च।

ननु प्रामाण्यस्यान्यानपेक्षत्वे स्वतस्त्वे च प्रत्यक्षादिप्रमाणमुत्पद्यमानमेव प्रमाणमित्येव गृह्येत। न च तत्तदाऽऽत्मानं गृह्णाति नतरां तद्धर्मत्वेन प्रामाण्यं गृह्णाति। न चागृहीतप्रामाण्येन व्यवहारसिद्धिरिति चेन्न। आत्मग्रहणमन्तरैव सत्तामात्रेण स्वकार्यक्षमत्वात्, प्रमाणेनार्थप्रतिपत्तावन्यानपेक्षणात्। तन्मात्रनिबन्धनस्य व्यवहारस्यापि तत एव निष्पत्तेश्च नैरपेक्ष्येण कृतकार्यस्य स्वसत्यां जिज्ञासायां पश्चात् प्रत्ययान्तरैरवबोधात् ज्ञानस्य ज्ञायमानत्वं न तत्प्रामाण्योपयोगि। कथं तदज्ञाने तत्प्रामाण्यग्रहणमिति चेत्। इत्थम्—नहि ज्ञानसंबंधित्वेन प्रामाण्यं गृह्यते, किन्तु विषये तथात्वमेव तद्विज्ञानस्य प्रामाण्यम्। विषयतथात्वनिबन्धनात् ज्ञाने प्रमाणबुद्धिशब्दयोः। तच्चाज्ञातादेव ज्ञानात् स्वत एव गृहीतमित्यनर्थकं प्रमाणान्तरम्। अप्रमाणं तु न स्वीयमप्रामाण्यं स्वतो गमयति, तस्यापि स्वरूपेणैव स्वानुरूपार्थग्राहकत्वात्। रजतज्ञानं हि शुक्तिशकलं रजतमित्येव गृह्णाति। न पुनर्नेदं रजतमिति, तेनाप्रमाणज्ञानमपि स्वतःप्रामाण्यमेवात्मनोऽविद्यमानमपि गृह्णत-

न्निबन्धनं तद्व्यवहारमपि प्रवर्तयति। अत एव तत्राप्रामाण्यग्रहणाय व्यवहारनिवृत्तये च परापेक्षाऽस्त्येव। यतोऽर्थान्यथात्वरूपमप्रामाण्यं ज्ञानस्यार्थतथात्ववन् न स्वतो गृह्यते।

नन्वेवं वेदस्यापि परत एव प्रामाण्यमनुमानादिभिरर्थान्यथात्वबोधसम्भवादिति चेन्न। अर्थान्यथात्वकारणदोषबुद्धेरेवाप्रामाण्यकारणत्वेन तदतिरिक्तानुमानादीनामनपेक्षणात्। न च तद्बुद्धेः प्रामाण्याय कारणान्तरापेक्षा, बुद्धेः प्रामाण्यस्वतस्त्वप्रतिपादितत्वात्। यत्रापि ज्ञानमिथ्यात्वं परेभ्योऽवगम्यते, तत्र पूर्वोक्तकारणद्वयमेव वक्तव्यम्। न यत्किञ्चित्साधर्म्यमात्रम्। न चानुमानेन चोदनादिवेदार्थान्यथाभावः परिकल्पयितुं शक्यते। अनुमानस्यागमविरुद्धत्वेनाभासमानयोगक्षेमत्वात्। न चानुमानेन बाधादागमस्यैव मिथ्यात्वमिति वाच्यम्; अन्योन्याश्रयदोषप्रसङ्गात्। तथाहि— सिद्धे मिथ्यात्वेऽनुमानम्, तस्मिंश्च सति बाधात् मिथ्यात्वमित्यन्योन्याश्रयः। न च यथाऽनुमानादन्यद्बाधकं नास्ति, तथैवागमादन्यत् साधकमपि आगमार्थस्य नास्तीति कथं वेदार्थसद्भावोऽपीति वाच्यम्; भावानवबोधात्। नानुमानसद्भावमङ्गीकृत्यैव बाधकान्तराभावादागमार्थमिथ्यात्वासिद्धिरुच्यते, किन्त्वनुमानमेव नोदेतीत्युच्यते। साधकस्त्वागमो विद्यत एव।

न चैकेन मानेन गृहीतस्यान्यैरगृहीतत्वेनाभावो भवति। तथात्वे जिह्वादिगृहीतानां नेत्राद्यगृहीतत्वे रसादीनामभावापत्तेः। तदुक्तम्—

"न चाऽन्यैरग्रहेऽर्थस्य स्यादभावो रसादिवत्।
तेषां जिह्वादिभिर्यस्मान्नियमो ग्रहणेऽस्ति हि॥"

ननु चोदनाप्रामाण्यमसिद्धमिति कुतस्त्योऽनुमानबाध इति। तन्न; त्वन्मते चोदनाप्रामाण्यासिद्धावपि वैदिकानां तत्सिद्धे-

र्निष्प्रत्यूहत्वात्। तत्रापि वेदादसंदिग्धाविपर्यस्तार्थबुद्धेर्निष्पन्नत्वेन प्रामाण्यासिद्धेरभावाच्च। द्वेषादसिद्धयुक्त्याऽपि न तदप्रामाण्यम्। न चात्मेच्छाद्वेषादिभिरप्रामाण्यं वक्तुं युक्तम्; अग्निदाहादिदुःखप्रत्यक्षस्याप्रामाण्यापादनासंभवात्। अभिलषितस्य ज्ञानस्याभिलाषविषयत्वमात्रे प्रामाण्यानुपपत्तेश्च। तस्मादालोकवत् वेदेन सर्वसाधारण्येन संदिग्धाविपर्यस्तार्थावबोधजननात् स्वाभाविकमेव प्रामाण्यम्।

नन्वेवं बौद्धवाक्यादपि ज्ञानोत्पत्तेः तस्यापि वेदवत् प्रामाण्यमिति चेन्न। अतीन्द्रियेऽर्थे पुरुषस्य दर्शनाशक्त्या भ्रान्तिविप्रलम्भमूलतया तद्वाक्यस्य दुष्टत्वेनौत्सर्गिकस्यापि प्रामाण्यस्य तत्रापवादात्। वेदस्य त्वपौरुषेयत्वात् तत्राप्रामाण्यशङ्काऽपि नोदेति। न च वेदस्य किमिति कर्ता नाङ्गीक्रियत, इति वाच्यम्; कल्पनागौरवात्। तथाहि—सम्यक्त्ववादिनो वेदानां प्रामाण्याय महाजनपरिग्रहं वर्णयन्ति। अन्ये स्वागमानाम्। तदिदं सर्वमप्रमाणमेव। नैतत्सर्वं मीमांसकैः कल्प्यते वेदप्रामाण्याय—"दृष्टादधिकं न किञ्चिददृष्टं परिकल्प्यते।" अपौरुषेयत्वेन नित्यनिर्दोषस्यासंदिग्धाविपर्यस्तावबाधितज्ञानजनकस्य वेदस्याप्रामाण्यशङ्काया नास्त्यवकाशः। दोषसंशयात् प्रामाण्यसंशयः, दोषनिश्चयाच्चाप्रामाण्यनिश्चयः। यथा चक्षुरादीनां प्रमाजनकत्वं स्वाभाविकम्, तथैव शब्दस्यापि स्वाभाविकमेव तत्। अत एव 'स्वर्गकामो यजेत' इति वेदवाक्येन विदितपदतदर्थशाब्दन्यायसतत्त्वरूपयागात् स्वर्गो भवतीत्यसंदिग्धमेव गम्यते। भवति स्वर्गो न वा ?, न भवत्येवेति संशयविपर्ययादिकमनेन न भवत्येव। तदुक्तं शबरस्वामिना—"यो हि जनित्वा प्रध्वंसते नैतदेवमिति स मिथ्याप्रत्ययः। न चैष कालान्तरे पुरुषान्तरेऽवस्थान्तरे देशान्तरे वा विपर्येति।"

ननु तर्हि बुद्धादिवाक्यस्यापि प्रमाजनकत्वस्वाभाव्याद् भवतु प्रामाण्यमिति चेन्न। तस्य पुरुषबुद्धिप्रभवत्वेन पुरुषाश्रित-भ्रमविप्रलम्भादिदोषसद्भावसम्भवेन; अलौकिकेऽर्थेऽप्रामाण्यात्। आप्तवचनस्य सम्भवत्प्रमाणमूलकस्य च वाक्यस्य प्रामाण्येऽपि अतथाभूतस्याप्रामाण्यनिश्चयात्।

नन्वेवं सम्यङ्मूलसापेक्षत्वेन प्रामाण्यस्य गुणापेक्षत्वमेवेति न प्रामाण्यस्वतस्त्वसिद्धिरिति चेन्न। अपवादभूताप्रामाण्यनिवृत्त्यर्थमेव गुणद्वारा दोषाभाववर्णनात्। अनाप्तेऽनृतवादिनि शक्येऽर्थे यद्यपि प्रमातृत्वशक्तिर्भवति, तथाप्यनाश्वासात् तत्राप्रामाण्यबुद्धिर्भवति। एवं सत्यवादिन्यपि अशक्येऽर्थे प्रमातुं शक्तिर्नास्तीति हेतोर-प्रामाण्यम्। अप्रामाण्यञ्चात्र मूलदोषादेव। न ह्यतीन्द्रियेऽर्थेऽपौरुषेय-वैदिकवाक्यमन्तरेणावगतिः सम्भवति। तथा च 'स्वर्गकामश्चैत्यं वन्देत', 'सर्वं शून्यम्' इत्यादीनि बौद्धवाक्यान्यसम्भवन्मूलकत्वेना-प्रमाणान्येव। यच्चोपदेष्टृत्वेन मन्वादिवत् वक्तव्यार्थज्ञानवत्त्वं बुद्धादिष्वपि कल्पनीयमित्युक्तम्। तन्न; बालोन्मत्तादीनामपि तद्दर्शनेन व्यामोहमूलकत्वेनाप्युपदेष्टृत्वसम्भवेन बुद्धोक्तेः प्रामाण्या-योगात्। मन्वादीनां वेदमनुसृत्यातीन्द्रियार्थोपदेष्टृत्वसम्भवेऽपि वेदमपलपतो बुद्धादेस्तदसम्भवात्।

यत्तु बुद्धादेः सर्वज्ञत्वेन अतीन्द्रियार्थोपदेष्टृत्वं सम्भवती-त्युक्तम्। तदप्यकिञ्चित्करम्; षड्भिः प्रमाणैः सर्वज्ञश्चेन्न विरोधः। यज्जातीयैः प्रमाणैर्यज्जातीयार्थदर्शनं भवति, तद्भवत्येव। एकेन तु प्रमाणेन सर्वज्ञतासमर्थने चक्षुषा रसादिप्रतिपत्तिरपि प्रसज्यते।

यत्तु योगजसामर्थ्येन साम्प्रतिकयन्त्रादिसाचिव्येन च सर्वज्ञता समर्थ्यते। तदपि तुच्छम्; सामर्थ्यातिशयस्य स्वविषय एव कार्यातिशयकरत्वेनाविषये तदयोगात्। तदुक्तं भट्टपादैः—

"यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता ॥"—इति ।

योगजादिसामर्थ्यैरपि न रूपे श्रोत्रप्रवृत्तिर्भवति, किन्तु व्यवहितविप्रकृष्टदेशस्य शब्दादेः श्रवणं सम्भवति, चक्षुषा च दूरस्थसूक्ष्मरूपादिदर्शनं सम्पद्यते । अत एवाद्यत्वेऽपि प्रमातृभेदेन सातिशयं प्रत्यक्षमुपलभ्यते । केचिदतिदूरमतिसूक्ष्मञ्च पश्यन्ति । ज्ञानमपि लौकिकं शास्त्रीयं च सातिशयं दृश्यते । एतेन कस्यचिद् बुद्धादेर्ज्ञानमत्यन्तातिशायितं सर्वविषयमपि कथं न भवेदित्यपास्तम् । स्वविषये दूरसूक्ष्मादिदर्शन एव सामर्थ्यातिशय उपयुज्यते, न तदतिलङ्घनेन । न ह्यतिशयितमपि श्रोत्रं रूपे प्रवर्तते, नेत्रादयो वा शब्दे प्रवर्तन्ते—इति पार्थसारथिमिश्राः ।

यत्तूक्तं प्रत्यक्षस्य न विषयनियमोऽस्ति, रूपवतां घटादीनामरूपवतां रूपादीनां दूरसूक्ष्माणाञ्च प्रत्यक्षदर्शनादिति बुद्धादेः सर्वविषयज्ञानवत्त्वं कुतो न स्यादिति । तन्न ; प्रत्यक्षस्य वर्तमानविषयत्वनियमात् । ततश्च भविष्यति धर्मे प्रत्यक्षस्य न प्रवृत्तिर्नतरां सर्वविषयेषु । ज्ञानस्याप्यस्ति विषयनियमः, यत्रास्य कारणं सम्भवति, तत्रैव प्रवर्तते, नान्यत्र । ज्ञानकारणमिन्द्रियलिङ्गादि, इन्द्रियं वर्तमानविषयमिति तज्जन्यं ज्ञानमपि वर्तमानविषयमेव । न धर्माधर्मेषु नापि सर्वार्थेषु प्रवर्तते । लिङ्गादिरहिततयाऽनुमानमपि न प्रवर्तते । अतो नानुमानादिभिरपि सर्वसत्त्वसिद्धिः ।

लौकायतिकैस्तु सर्वज्ञकल्पनावदेव अपौरुषेयत्वकल्पनाऽपि निष्प्रामाणिकैवोच्यते । तेनैवोच्यते—

"सर्वज्ञो दृश्येत तावन्नेदानीमस्मदादिभिः ।
निराकरणवच्छक्त्या न चासीदिति कल्पना ॥"

'अतीतः कालः सर्वज्ञशून्यः, कालत्वादद्यत्ववत् ।'

न वाऽऽगमो बुद्धादिसर्वज्ञत्वसिद्धौ प्रमाणम्। सिद्धे सर्वज्ञे तदागमस्य प्रामाण्यम्, तत्प्रामाण्ये च सर्वज्ञत्वसिद्धिरित्यन्योन्याश्रयात्। पुरुषान्तरप्रणीतस्य तु मूलान्तरासम्भवात् न सर्वज्ञसद्भावे प्रामाण्यम्।

यत्तूक्तम्—"नित्यागमगम्यः सर्वज्ञः' इति। तन्न; तदभावात्। न च 'यः सर्वज्ञः स सर्ववित्' इति नित्यागमोऽस्त्येवेति वाच्यम्; तस्यार्थवादरूपत्वेन तत्र तात्पर्याभावात्। बुद्धादिसर्वज्ञत्वबोधपरत्वेऽनित्यबोधकत्वेनागमस्याप्यनित्यत्वापत्तेः। किञ्च यद्यागमनित्यत्वमिष्यते, तर्हि सर्वज्ञकल्पना व्यर्थैव। येन नित्येनागमेन सर्वज्ञो बोद्ध्यते तेनैव धर्माधर्मबोधा भवतु, किं सर्वज्ञकल्पनया? यतः सर्वज्ञत्वेनाभिमता बुद्धादयो धर्ममेव प्रतिपादयन्ति। केश्चित्तु इन्द्रियार्थसंबंधविषये सर्वं क्षणिकं संस्कृतमित्यादि सत्यवचनं दृष्ट्वा श्रद्धेयेऽर्थे धर्मे चैत्यवन्दनादिवाक्यमपि तद्वचनात्प्रमाणमूलमित्युच्यते। तदुक्तम्—

"कीटसंख्यापरिज्ञानं तस्य नः कोपयुज्यते।
दूरं पश्यतु मा वाऽसौ तत्त्वमिष्टं तु पश्यति॥'—इति।

तदप्यपेशलम्; क्षणिकादिवाक्यस्यापि बाध्यसिद्ध्या चैत्यवन्दनादि वाक्यस्य सुतरां बाधोपपत्तेः। वस्तुतस्तु चैत्यवन्दनादिबुद्धवाक्यम्, अप्रमाणम्, अलौकिकार्थत्वे सति पुंवाक्यत्वात्, उन्मत्तवाक्यवत्।

यत्तूक्तं बुद्धेनैव सर्वज्ञोऽस्मीत्युक्तमिति। तदप्यसत्; बुद्धोऽसर्वज्ञ इत्यन्यैरुक्तत्वात्। वस्तुतस्तु एवमनृतमुद्धतञ्च बुद्धो वदतीति न सम्भाव्येत। यत्तु बुद्धः सर्वज्ञ इत्यस्ति लौकिकानामविच्छिन्ना स्मृतिः, तेन तदानीन्तनैर्बुद्धस्य सर्वज्ञत्वं प्रमितमिति कल्प्यत इति। तदपि तुच्छम्; विप्रलिप्सया बुद्धेनागमः प्रणीत इति पुराणादिस्मृतिविगानात्। सर्वज्ञत्वस्मरणस्य चासम्भवन्मूलत्वात् शिष्टे-

-स्त्रपरिग्रहाच्च । न च बुद्धस्य सर्वज्ञत्वे किञ्चित् प्रमाणमस्ति । सर्वविषयज्ञानरहितैस्तस्य ज्ञातुमशक्यत्वात् । यदि तु बुद्धस्य सर्वज्ञत्वज्ञानार्थमन्योऽपि सर्वज्ञः कल्प्यते, ततस्तेनैव प्रकारेणान्यान्यसर्वज्ञकल्पनायामनवस्थापातः । तदुक्तम्—

"य एव स्यादसर्वज्ञः स सर्वज्ञं न बुद्ध्यते ।
सर्वज्ञोऽनवबुद्धश्च येनैव स्यान्न तं प्रति ।
तद्वाक्यानां प्रमाणत्वं मूलाज्ञानेन वाक्यवत् ।।"

किञ्च—रागद्वेषादिरहितो निर्व्यापारः शून्यनिष्ठो बुद्ध आसीदिति बुद्धैरभिप्रयते । तादृशस्य प्रक्षीणरागद्वेषस्य बुद्धस्य लाभपूजाख्यातिरागनिमित्तं स्वयूथ्यस्य निमित्तं वा न सम्भवत्यागमप्रणयनम् । निर्व्यापारस्य च तस्य निर्विकल्पेन प्रत्यक्षेण विश्वं विश्वं प्रत्यक्षतः विकल्पमूलिका देशनाऽपि न सम्भवत्येवेति तदन्यप्रणीत एव बौद्धागमः ।

यत्तु तत्सान्निध्यमात्रतश्चिन्तामणेरेव कुड्यादिभ्योऽपि देशना निःसरन्तीति । तत्तु श्रद्धाजडस्यैव शोभते । कुड्यादीनिःसृतासु देशनासु बुद्धप्रणीतत्वानिर्णयेन प्रामाण्यासम्भवात् । विप्रलम्भकैः पिशाचादिभिरपि विप्रलम्भार्थं तादृक् देशनाप्रकाशसम्भवात् । यत्तूक्तम्—"स्वभादेव तत्तदिन्द्रियाद्यनपेक्षमेव पुरुषः सर्वं वेत्ति । देहवृतस्तु इन्द्रियादिद्वारेण किञ्चिदेव जानाति । विगलितदेहस्य तु स्वाभाविकं सार्वज्ञमभिव्यज्यते" इति । तदप्यपेशलम्; इन्द्रियाद्यनपेक्षस्य जीवस्य सूक्ष्मातीतादिसर्वविषयं ज्ञानं भवतीत्यत्र तदागममन्तराऽन्यस्य प्रमाणस्यासत्त्वात् । तदागमस्य प्रमाणत्वे सर्वज्ञत्वसिद्धिः । सर्वज्ञत्वासिद्धौ तदागमप्रामाण्यमित्यन्योन्याश्रयः । अपि च विगलितशरीरस्याशरीरस्य ताल्वादिरहितस्य कथमागमप्रणयनम् ? सशरीरस्यासर्वज्ञत्वेन तत्प्रणीतागमस्य च कथं प्रामाण्यम् ? यदि तादृक् कश्चन मुक्तः सर्वज्ञोऽद्यत्वे दृश्येत, ततो-

ऽन्योऽपि सम्भाव्येत। एवमेव प्रजापतेः प्रथममार्षज्ञानेनैव वेदाऽवबुद्धो भवतीत्यपि न विचारसहम्; अनुच्चरितशब्दज्ञानमपि सर्वज्ञज्ञानवत् धर्माधर्मविज्ञानवच्चाकारणमेव; तत्रापि तेन कृतो वा नित्यसिद्ध एव प्राप्तो वेत्यनाश्वासस्यैवाप्रामाण्यकारणत्वसम्भवात्। न च तद्वचनात् विश्रम्भसम्भवः; अद्यत्ववत् तदानीमपि पुरुषाणामनृतवादित्वसम्भवात्।

अयमागमप्रतिभासः स्वप्नादिवत् आकस्मिको निर्निमित्तश्चाप्रमाणञ्च भवतीत्यविश्रम्भ एव। अस्मिन् पक्षे बहून्यदृष्टानि कल्पनीयानि। अनुच्चारितशब्दग्रहणसामर्थ्यवतोऽसाधारणपुरुषस्य कल्पनम्। तथैवागमनित्यतां कल्पयित्वा जन्मान्तरानुभवनिबन्धनं तत्स्मरणकल्पनं गौरवास्पदम्। कथं हि द्विपरार्द्धपरिमितं प्रलयकालमतीत्य एतावान् ग्रन्थराशिः मात्रयाऽपि अन्यूनानतिरिक्तः स्मर्तुं शक्येतापि? यदि चैवं नित्यागमस्य जन्मान्तरानुभवजन्यस्मरणविषयत्वं सम्भवति, तर्हि बुद्धादेर्धर्मविषयस्मृत्यभ्युपगमे को विरोधः? यद्यनुच्चारितशब्दग्रहणं सम्भवति, तर्हि धर्माधर्मद्यर्थग्रहणे का बाधा? यत्तूच्यते शब्दस्यैन्द्रियकत्वाद् ग्राह्यत्वाद् ग्राह्यत्वम्, धर्माधर्मादेस्त्वतीन्द्रियत्वात् अग्राह्यत्वमिति। तन्न; अनुच्चारित शब्दस्यापि अतीन्द्रियत्वात्। अपि च धर्माधर्मादिग्रहणवादिनां नये पुमान् स्वतन्त्र एवाभिप्रेतः। अतः तत्प्रत्ययात् अर्थनिश्चयो युक्तः। नित्यागमग्रहणवादिनां तु प्रजापत्यादिपुरुषाः धर्माधर्मग्रहणेऽपि वेदपरतन्त्राः। स्वरूपसिद्धयेऽपि तत्परतन्त्राः इति न कस्यचित्स्वातन्त्र्यम्। न च पूर्वमीमांसकनयेऽपि पूर्वपूर्वपुरुषाधीनमुत्तरोत्तरपुरुषाणां वेदस्वरूपनिर्द्धारणमिति समानमेव पारतन्त्र्यमिति वाच्यम्; भावानवबोधात्। तथाहि—एकपुरुषाधीनत्वे कृतकत्वाशङ्कया यथावद् दृष्टो विप्लवो वा जात इति संशयात् न स्वातन्त्र्येणागमस्य प्रामाण्यं सम्भवति। अनेकपुरुषस्थले तु नैष

दोषः; जन्मान्तरानुभूतस्य दीर्घकालव्यवहितत्वेन स्मर्तुमशक्यत्वेन कृत्वैव वेदं श्रद्धार्थं स्मृतमुपदिशतीति शङ्कया तत्राविश्रम्भः। एकस्मिन्नेव जन्मनि बहुशोऽनुभूय स्मर्यमाणे तु नायमपि दोष इति न स्वातन्त्र्यहानिः। एतस्य प्रतिभाने तु कृतकत्वाशङ्कया सम्भवत्येव पारतन्त्र्यम्। अत एव सम्प्रदाये बहवः पुमांसोऽभिप्रेयन्ते। ततो यथा वेदानां कर्ता कश्चन नास्ति, तथैवैकः कश्चन सम्प्रदायप्रवर्तकोऽपि नास्ति; तथात्वे कृतकत्वसंशयापत्तेः। तत्तदन्यकुरानबाइबिलादिग्रन्थानुयायिभिरपि ग्रन्थकर्तुः सम्प्रदायप्रवर्तकत्वमेवोच्यते इति तद्वैलक्षण्यमेव वेदस्य स्यात्। बहुषु पुरुषेषु सम्प्रदायस्याद्यत्ववत् पूर्वकालेऽपि विद्यमानत्वेन न शङ्कावकाशः। यथाऽद्यत्वे सर्वे पूर्वपूर्वपुरुषेभ्यो वेदमधीयाना दृश्यन्ते, न कर्तारः, कालान्तरेऽपि तथात्वाङ्गीकारेण न दृष्टहानिर्न वाऽदृष्टकल्पना, कर्तुस्तद्दोषाणां चासत्त्वात् स्वाभाविकमेव वेदानां प्रामाण्यम्। तत एवानुमानिकबाधोऽपि आभासमानयोगक्षेम एव।

यत्तूपदेशित्वान्यथानुपपत्त्या मन्वादिवत् बुद्धादेरपि ज्ञानवत्त्वोपपत्तिरिति। तदप्यकिञ्चित्करम्; बालोन्मत्तादौ व्यभिचारात्। वेदान् ज्ञात्वोपदेशश्चेत्; सिद्धसाधनमेव, मन्वादेस्तथात्वाभ्युपगमात्। बुद्धोपदेशस्य च वेदासिद्धत्वान्न तत्र वेदजन्यज्ञानवत्त्वमप्यभ्युपगन्तुं शक्यते। पुरुषवचनादर्थनिश्चये जातेऽपि प्रत्यक्षादिनिश्चयवत् मूलदोषावगमे बाध्यत एवेति तदप्रामाण्यम्। वेदस्यानपेक्षितत्वेन स्वत एव प्रामाण्यम्। पुरुषस्य तु अन्यथा संविदानोऽप्यन्यथा विवक्षति। अत एव पौरुषेयवचनात् तन्मूलप्रत्ययो नावधारयितुं शक्यः।

वाक्यरचनायां ज्ञानापेक्षया विवक्षा प्रत्यासन्ना भवति। भ्रान्तस्य त्वन्यविवक्षायामन्यद्वाक्यं दृश्यते। तथा च यदि वाक्यानुरूपविवक्षाऽपि निश्चेतुं न पार्यते, तदा वाक्यानुरूपं

ज्ञानकल्पनं तु दूरापास्तम्। ततो यथाविवक्षं यथाज्ञानं वाक्यं प्रवर्तते इति वक्तुं न शक्यते, तथाप्याप्तवाक्येषु वक्तृज्ञानपूर्वकत्वं निश्चेतुं शक्यते। ततोऽन्यत्र भ्रमविप्लवादिसम्भवः। तथा च पौरुषेयवाक्यानां सामान्येन मूलज्ञानावधारणशक्तिर्भवति, अनाप्तवाक्यानां तदशक्तिश्च। तत एव केषाञ्चित्प्रामाण्यमप्रामाण्यञ्चान्येषाम्।

ननु तर्हि कथं वाचकत्वविरहिताद् वाक्यात् तज्ज्ञानमवगम्यत इति चेन्न। ज्ञानावधारणस्यानुमानिकत्वेन बाधाभावात्। पदपदार्थरचनाधीना वाक्यार्थप्रत्यया उक्तरचना च विवक्षाधीना। सा च ज्ञानाधीनाऽन्वयव्यतिरेकाभ्यामेतदवगम्येत।

यद्यपि पौरुषेयवाक्यादर्थनिश्चयो भवति, तथापि तत्प्रामाण्यं वक्तृज्ञानमुखेनैव भवति तत एवाप्तोक्तकारी पर्यनुयुक्तः सन् आप्तमेव निर्दिशति। न चैवमर्थमनवबोधयतः शब्दस्य वाचकत्वमेव न स्यात्। न चानवगतबोधकत्वानां लोके वेदे वा बोधकत्वं सम्भवति, ततो वेदप्रामाण्यमपि दुर्घटमिति वाच्यम्; वक्तृज्ञानान्तरितत्वेन शब्दानामुदासीनत्वात्। वक्तृज्ञानस्यैव तत्र प्रामाण्यप्रयोजकत्वात्। वाक्यात्पूर्वमर्थप्रतीतौ सत्यामपि तत्प्रतिष्ठाया वक्तृज्ञानान्तारितत्वात् यावत्तन्नावगतं भवेत्, तावदुत्पन्नस्यापि निश्चयस्यासत्समत्वात् शब्दा उदासीना इव भवन्ति। वक्तृज्ञानेऽवधारिते तु शब्दैः पूर्वसञ्जातमपि अर्थे प्रामाण्यं पुनः प्रतिष्ठाप्यते। वाक्यस्य पुरुषबुद्धिप्रभवत्वेन तद्दोषेण दोषसम्भवात् संशयो जायते। मूलज्ञानस्य सम्यक्त्वे तु संशयनिवृत्तौ निश्चयः प्रतिष्ठितो भवति। यद्यपि वक्तृज्ञानमर्थज्ञानगम्यमेवेत्यर्थज्ञानं वक्तृज्ञानात्पूर्वमेव भवति, तथापि तत्प्रामाण्यनिर्णये वक्तृज्ञानस्यैव पूर्वभावत्वम्। एवं पौरुषेयेषु वाक्येषु पुरुषबुद्धिनिमित्तत्वात् अप्रामाण्यं युज्यते। वेदे तु वक्तुरभावात् वक्तृबुद्ध्यनपेक्षत्वात् स्वत एव प्रामाण्यम्।

यत्तु अनाप्तवचनवत् वचनत्वेन वेदस्याप्यप्रामाण्यं शङ्क्येत। तदपि न क्षोदक्षमम्; लौकिकवाक्यस्याप्रामाण्यं दोषनिमित्तं न वाक्यत्वहेतुकत्वम्। प्रत्यक्षस्य भूतार्थविषयकत्वेन भव्यस्य धर्मादेर्न तद्विषयत्वसम्भवः। इन्द्रियाद्यगम्यभूतभविष्यदाद्यर्थ-बोधकत्वं शब्दस्यैव सम्भवति। तदुक्तम्—

'अत्यन्तासत्यपि ह्यर्थे शब्दो ज्ञानं करोति हि।'

ननु वेदो यदि पौरुषेयस्तर्हि प्रत्यक्षाद्यनवगतधर्मादि-बोधकत्वेनासम्भवन्मूलकत्वेन बुद्धादिवाक्यवत् तस्याप्यप्रामाण्य-मेव। अपौरुषेयश्चेत् प्रामाण्यहेतुभूताप्तोच्चरितत्वाभावेन सुतरां तस्याप्रामाण्यमिति चेन्न। ज्ञानस्य प्रामाण्यस्वतस्त्वाभ्युपगमेन प्रामाण्यकारणानपेक्षत्वेनापौरुषेयत्वे दोषाभावात्। अप्रामाण्यं तु कारणाधीनम्। तच्च ज्ञानानुत्पत्तिः, उत्पन्नस्य ज्ञानस्य संशयाद्यात्मकता, उत्तरकाले बाधकप्रत्ययान्तरोत्पत्तिः, करणे दोषवत्ताज्ञानञ्च। प्रकृते वेदस्य कर्तृस्मरणाभावादियुक्तिभिर-पौरुषेयत्वसिद्ध्या न कारणदोषज्ञानं शक्यशङ्कम्; "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यादिवाक्यैरग्निहोत्रहोमात् स्वर्गो भवति इति ज्ञानमुत्पद्यत एव। न चैभिः संशयाद्यात्मकं ज्ञानमुत्पद्यते। अग्निहोत्रहोमात् स्वर्गो न भवतीति बाधकज्ञानमपि कस्यापि न भवत्येव। अग्निहोत्रहोमात् स्वर्गो न भवतीति न वा केनापि प्रमातुं शक्यते। येन प्रमाणेन लौकिकसाध्यसाधनभावो ज्ञायते, तेनैव तदभावोऽपि। नहि चक्षुरन्तरा रूपाभावो ज्ञायते। तथा चाप्रा-माण्यकारणत्वेन सम्भावितेष्विह कस्यापि अनुपलम्भादप्रामाण्य-शङ्काया दूरापास्तत्वात् स्वतःसिद्धं प्रामाण्यमनपोहितमेव स्थितं भवति।

ननु यथा चक्षुषो रूपोपलम्भहेतुत्वं रूपोपलम्भेन कार्येण सिद्ध्यति, एवं मनुबुद्धादिरूपदेशित्वरूपकार्येण वेदमन्तरापि धर्मा-

धर्मज्ञानवत्त्वसिद्धिरिति चेन्न । वैदुष्योपदेशित्वयोः व्याप्त्यसिद्धेः । तथाहि—बालोन्मत्तादिष्वनवगतार्थेष्वप्युदेशित्वं दृश्यत इति व्यभिचारः । मन्वादिवैदिकानान्तु वैदिकार्थज्ञानपूर्वकत्वमेवोपदेष्टृत्वमिति सिद्धसाधनम् । यत्तु सामान्यतो दृष्टं वितथमुपलभ्य वाक्यत्वसाम्येन वेदस्यापि वैतथ्यं शङ्क्यते । तदज्ञानविजृम्भितम्; वाक्यत्वस्याप्रामाण्यप्रयोजकत्वात् । पौरुषेयवाक्यस्य तु पुरुषाश्रितदोषादिभिरेवाप्रामाण्यम्, न वाक्यत्वप्रयुक्तम् । वेदे तु संशयविपर्ययजनकत्वात् बोधकत्वात् बाधकाभावाच्चानधिगतासंदिग्धबाधितार्थविषयज्ञानजनकत्वदर्शनेन अप्रामाण्यकारणाभावात् स्वाभाविकं प्रामाण्यमेव ।

ननु 'वेदाः पौरुषेया वाक्यकदम्बरूपत्वात्, महाभारतादिवत्' इत्याद्यनुमानैर्वेदानां पौरुषेयत्वमेवेति चेन्न । स्मर्यमाणकर्तृकत्वस्योपाधित्वात् । पौरुषेयमहाभारतादिवाक्यं स्मर्यमाणकर्तृकमेव । न च तथा वेदे तत्साधयितुं शक्यते ।

नन्ववश्यं वाक्यानि केनचित्प्रणीतानि, तथैव शब्दानामर्थैः सम्बन्धोऽपि सकर्तृक एवाभ्युपेय इति चेन्न । कर्तुरनुपलम्भात् । यदि स्यात् कर्ता, प्रत्यक्षादिप्रमाणैरुपलभ्येत । यद्दर्शनयोग्यमुपलम्भसामग्रीसत्त्वेऽपि नोपलभ्यते, तन्नास्त्येवेति मन्तव्यम्; यथा—शशशृंगादिकम् । न च चिरवृत्तत्वात्कर्ता नोपलभ्यते, नासत्त्वादिति वाच्यम्; तथात्वेऽपि तत्स्मरणस्यावश्यकत्वात् । न हि चिरवृत्तोऽपि न स्मर्यते । तथा च वेदकर्तुः स्मरणाभावात् नास्त्येव कश्चिद्वेदकर्तेति प्रतीयते ।

ननु कचिदरण्यादिप्रदेशेषु कूपारामादीनां मुक्तश्लोकानाञ्च सन्तोऽपि कर्तारो न स्मर्यन्ते, तथेहापि समपदयोः कर्त्रस्मरणमुपपन्नमिति । तदसारम्; देशोत्साद-कुलोत्साद सम्प्रदायविच्छेदादिभिः पूर्वोक्तकर्तृणामस्मरणोपपत्तावप्यध्ययनाध्यापनतदर्थानुष्ठानश-

पदार्थव्यवहारपारम्पर्यस्याविच्छेदेऽपि कर्तृविस्मरणानुपपत्तेः अत एव प्रयोगः—"वेदाः अपौरुषेयाः, सम्प्रदायाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वादात्मवत्, व्यतिरेके भारतवत्।"

न च घटकर्तृकुलालस्मरणवत् वेदतत्पदार्थसम्बन्धकर्तृस्मरणे व्यवहर्तृणां निष्प्रयोजनमिति कर्तृविस्मरणमुपपद्यत एवेति वाच्यम्। वैषम्यात्; तथाहि—निष्प्रयोजनत्वात् कुलालविस्मरणमुपपद्यते, न तु तथा वेदकर्त्रादिस्मरणं निष्प्रयोजनं व्यवहाराणां तदधीनत्वात्। नहि पाणिनेर्विस्मरणे आदैचां वृद्धिशब्देन व्यवहारः सम्भवति। तथा च यः पदपदार्थसम्बन्धं करोति, यश्च वेदं निर्माय तदध्ययनाध्यापनतदर्थयागोपासनज्ञानादिव्यवहारं प्रवर्तयति, न तस्य विस्मरणे व्यवहारः सम्भवति। वाक्यादर्थप्रतिपत्तिः तदर्थानुष्ठानञ्च वाक्यकर्तुः तदाप्तत्वस्य च स्मरणमन्तरा न सम्भवतः, अनाप्तवाक्यात्तददर्शनात्। यागादेः स्वर्गादिसाधनतायाः प्रमाणान्तरागोचरत्वात्। तद्बोधककर्तरि विश्रम्भादेव सर्वे वेदार्थयागाद्यनुष्ठाने प्रवर्तेरन्निति कथं कर्ता विस्मर्येत ? तेनावश्यस्मर्तव्यत्वे सत्यस्मर्यमाणः स्वस्याभावमेवावगमयिष्यति। पाणिनिभिन्नस्य पाणिनिमतानुसारिणो वा वृद्धिशब्दव्यवहारतो न केचिदादैचोऽवगच्छन्ति। यथा वाऽपिङ्गलस्य पिङ्गलानुसारिणो वा मकारव्यवहारतो न केचित् सर्वगुरुत्रिकं प्रतिपद्यन्ते। किन्तु वृद्धिरादैजिति वृद्धिसंज्ञाकर्तुः पाणिनेः वृद्धिर्यस्याचामादिस्तद्वृद्धमिति व्यवहारतो वृद्धिशब्देनादैचो जानन्ति। एवमेव 'सर्वगुरुर्मः' इति मकारसम्बन्धकर्तुः पिङ्गलाचार्यस्य व्यवहारतः सर्वगुरुत्रिकं प्रतिपद्यन्ते। तथैव वेदवाक्यादर्थप्रतिपत्तृभिरवश्यं पदपदार्थसम्बन्धकर्ता तादृशपदकदम्बात्मकवेदवाक्यकर्ता चैक एव, स चाप्त इति स्मर्त्तव्याः, न च स्मर्यन्ते।

समयव्यवहारयोरेककर्तृकत्वविस्मरणे च नार्थनिश्चयः।

प्रकृते च विनापि कर्तृस्मरणं, वेदवाक्यादर्थनिश्चयस्य प्रसिद्धत्वान्न कश्चिद् वेदकर्ता सिद्ध्यति। यदि कथञ्चिद् विस्मरणमुपपद्येतापि, तथापि प्रमाणमन्तरेण न कर्तृनिर्णयः कर्तुं शक्यः। केवलस्यानुपलम्भस्य वस्त्वभावासाधकत्वेऽपि प्रमाणाभावसहकृतस्य शशविषाणादिवत् तथात्वे बाधकाभावात्। ये पौरुषेयतां समर्थयन्ते, तेऽपि परम्परया कर्तृविशेषस्मरणं वक्तुं न शक्नुवन्ति। सामान्यतो दृष्टेन कर्तारमनुमाय स्वाभिमतं कञ्चन कर्तारं साधयन्ति। केचिदीश्वरम्, अन्ये हिरण्यगर्भम्, प्रजापतिं केचिद्, अग्न्यादीन् देवानपरे। मन्वादिवत् स्मर्यमाणे वेदकर्तरि नैतादृशी विप्रतिपत्तिर्युज्यते।

स्मर्तव्यत्वे सति अस्मरणात् कर्त्रभाव एवाध्यवसीयते। "ब्रह्म स्वयम्भु", "वाचा विरूपनित्यया", "अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा", "अत एव नित्यत्वम्" इत्यादिश्रुतिस्मृत्यनुसारेण वेदानां नित्यत्वावगमाच्च कर्त्रभावोऽध्यवसीयते। अत एव 'तस्माद् यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे', 'अग्नेर्ऋग्वेद' इत्यादिवचनानां तु सम्प्रदायप्रवर्तकबोधपरत्वमेव, न कर्तृबोधकत्वम्। 'यो वै ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुत्यनुरोधात् चतुर्मुखस्य विधातापीश्वरो न वेदान् विदधाति, किन्तु विद्यमानानेव ब्रह्मणो हृदि प्रहिणोति।

अपि च—को वेदकर्ता भवेत्? कश्चिन्मनुष्यो वा, योगी वा ईश्वरो वा? नाद्यः; मनुष्येषु धर्मादिज्ञानस्य वेदजन्यत्वादेव तत्कर्तृत्वासम्भवात्। न द्वितीयः; धर्माधर्मादिज्ञानं योगिनो बाह्येन्द्रियजन्यं मनोजन्यं वा? नाद्यः; धर्माधर्मादेर्बाह्येन्द्रियायोग्यत्वात्। न द्वितीयोऽपि, आत्मनस्तद्योग्यगुणातिरिक्तज्ञानजनने मनसोऽसामर्थ्यात्। धर्माधर्मयोरात्मगुणत्वेऽपि अयोग्यत्वान्न मनोविषयत्वं सम्भवति। अपि च योगिनो योगज-

सामर्थ्यमपि निर्हेतुकं, सहेतुकं वा ? न प्रथमः; सर्वेषामपि तथात्वापातात् । नाप्यन्त्यः; यागादिलक्षणधर्मस्य हेतुत्वे ततः प्राक् तज्ज्ञानमावश्यकमेवेति तद्धेतोर्वेदस्य प्राक् सिद्धत्वस्याभ्युपेयत्वात् । नापि तृतीयः, वेदादीश्वरसिद्धिः, ईश्वरश्च वेदानां प्रणेता इत्यन्योन्याश्रयात् । बौद्धादयस्तु बुद्धादीनां सर्वज्ञत्वं प्रसाध्य तदभिप्रायानुसारीणि बौद्धाद्यागम-वाक्यान्येव धर्ममूलत्वेनाभ्युपयन्ति ।

न च सर्वज्ञो नास्ति। तथाहि—तदभावव्यवहारो बाधकप्रमाणसद्भावाद् वा साधकप्रमाणासद्भावाद् वा । न तावद् बाधकप्रमाणसद्भावः । न खलु प्रत्यक्षं तस्य बाधकम् । रजतस्येव समारोपितस्य शुक्तितत्त्वविषयः सम्भवति, तद्विरुद्धोपस्थानासम्भवात् । सर्वज्ञताया अत्यन्तपरोक्षायाः केनचिदपि सह प्रत्यक्षप्रतीतेन विरोधानवगतेः । नाप्यनुमानमस्य बाधकम्, तद्धि विधिनिषेधसाधनतया द्विविधम् । तत्र विधिसाधनं स्वभावहेतुक कार्यहेतुकं न निषेधे साध्ये प्रवर्तते, अन्यसाधनत्वेऽन्यसाधनस्यातिप्रसङ्गात् । अनुपलब्धिलिङ्गं प्रतिसाधनं तु भवेत् । तच्च स्वभावानुपलम्भसाधनादन्यदिह सर्वज्ञविरुद्धार्थविधानेन वा तत्कारणव्यापकनिषेधेन वा सर्वविदभावं साधयेत् । न तावत्स्वभावविप्रकर्षिणा सर्वविदा सह कस्यचिदपि प्रतीयमानस्य विरोधो दृष्टपूर्वः, विरोधिप्रतिपत्तिनान्तरीयकतया विरोधावगतेः । विरोधिप्रतिपत्तौ वा नात्यन्ताय तन्निषेधः । न च प्रत्यक्षानुपलम्भसाधनं कार्यकारणभावः स्वभावप्रकर्षवति सर्वविदि शक्यावगमः । अत एव व्यापकत्वमपि कस्यचिद् दुरवसेयमेव सर्वविदि । नापि विपक्षे बाधके प्रमाणवृत्तिः, क्षणिकत्वस्येव सत्त्वे सर्वविद्व्यापकभावावगमनिबन्धनसद्भावात् । भावे वा निषेधो नास्ति अत्यन्ताय तस्य, न खलु खपुष्पं कस्यचिद् व्याप्यं सम्भवति, न चान्यनिवृत्तावन्यस्य निवृत्तिरतिप्रसङ्गात् । तदुक्तम्—
"अन्यस्यैव निवृत्त्यान्यनिवृत्तिस्तु कथं भवेत् । नाश्ववानिति

मर्त्येन न भाव्यं गोमतापि किम् ॥" न च सत्त्वज्ञेयत्वादयः सर्वज्ञता-सहभुवः सहलश उपलब्धा व्याप्त्या विमतस्य पुरुषधौरेयस्य विरुद्धोपस्थानेन सर्वज्ञतां प्रतिक्षिपन्तीति साम्प्रतं सत्त्वादेरसर्व-चिद्व्याप्त्यसिद्धेः । न खलु दर्शनादर्शनमात्रनिबन्धनं व्याप्ति-ज्ञानं मा भूच्चैत्रः श्यामो मैत्रीतनयत्वाद् दृश्यमानमैत्रीतनय-स्तोमवदित्यनुमानम् । तत्तनयताया अश्यामताविरोधाभावे सन्दिग्धव्यतिरेकित्वान्नानुमानमिति चेन्न । इहापि समानत्वात् । नहि सर्ववित्तया सह सत्त्वादेः कश्चिद्विरोधो येनासौ न सन्दिग्धव्यतिरेकः स्यात् । द्वयी हि विरोधावगतिः, सहान-वस्थानं छायातपवत्, परस्परपरिहारो वा भावाभाववत् । न तावद-विकलकारणस्य सर्वज्ञत्वस्यालोकस्येवाभावः । सत्त्वादेः स्तत-मसस्येव भावेऽभावो यतः सहानवस्थितिरूपविरोधसङ्गतिः स्यात् । तथा च भावे वा नात्यन्ताभावः सर्वज्ञताया इत्युक्तम् । नाप्युत्तरो, न खलु सर्वज्ञतासत्त्वादिपरिहारेण सत्त्वादयो वा तत्परिहारेण भावाभाववत् प्रत्ययपथमवतरन्ति । न च सर्वज्ञतया तेषां व्याप्तिरस्तीत्युक्तम् । न चोपदेशप्रणयनमेव बाधकं तत्त्वदर्शनस्य । तथाहि—उपदेशो विकल्पविज्ञानयोः सतोरेव भवति, विकल्पश्च समारोपितगोचरतया मिथ्येति न तथागतविज्ञानं भवितुमर्हति । तदयमुपदेशो निषेध्यसर्वविषय-सत्त्वविज्ञानं विरुद्धसमारोपितगोचरविकल्पकार्य इति विरुद्धकार्योपलब्ध्या बुद्धादीनां सर्वज्ञत्वाभावसाधनम् उपदेशाभावे वृथा तत्साधनं तत्सन्निधानाद् वा चैत्यवन्दनादिचोदनानाम् । अभिनिःसृतत्वाभ्युपगमेऽनाश्वास इति । तन्न; विकल्पस्य सर्व-विज्ञानत्वाविरोधात् । द्विविधो हि विकल्पः, विपर्यासपूर्वकः अतत्पूर्वकश्च । विपर्यासपूर्वकः सर्वसाधारणस्य, अतत्पूर्वकस्तत्रभवतः सर्ववेदिनः । न खल्वसौ भ्रान्तो विकल्पवानपि, किन्तु विदित-समस्तवस्तुतत्त्वविस्तारः, करुणापराधीनमानसो दुःखिन उपदेष्टु-

कामः । न च वचनमन्तरेण तत्सम्भवः । विकल्पं विना वचनमप्यसम्भवीति, तस्याताच्त्विकत्वं विद्वानपि तमाहरति । यथा नैरात्म्यतत्त्वं विद्वानपि विकल्पसमारोपितमात्मानं निषेधति नास्त्यात्मेति, यथा वा वैयाकरणो गाव्यादिशब्दानसाधून् जानानोऽपि पृथग्जनप्रतिपिपादयिषया प्रयुञ्जानोऽपि नापशब्दकारी । तदिदमाहार्यमस्य रूपं न तात्त्विकमिति तत्त्वविदो नोपदेशविरोधो न चैषां रागादिमत्ता न खलु कृपारागपक्षे वर्तते ।

ननु परदुःखप्रहाणेच्छोरपि राग एव । मैवम्; न हीच्छामात्रं रागोऽपितु चित्तमलमात्मनो दर्शनावरणभूतगुणाभिनन्दनं रागमाचक्षते । न ह्यसति नित्यात्मदर्शने स्वार्थतृष्णापरिप्लुतः कश्चित् परिस्पन्दते । यथाहि चैत्रः स्वतो भिन्नं मैत्रमुदीक्षमाणः स्वगतसुखतृष्णापरिप्लुतो न मैत्रसुखाय घटते, तथा पूर्वापरक्षणविविक्तविज्ञानमात्रमात्मानं साक्षादीक्षमाणः सन्निपतिततद्विपरीतलक्षणान्तरोपकारकर्मणि प्रवर्तते, प्रवर्तते च स्वार्थतृष्णापरिप्लुतः, तेनावगच्छामोऽवगच्छति नूनमयमहमिति विभिन्नानपि स्वचित्तक्षणानेकतया । तदिदं सहजमात्मादर्शनं निदानं रागादीनाम् ।

न च सर्वविदः करुणाद्दमुपकुर्यां परानित्येवमाकारापि सत्त्वदर्शनावयवा यस्मान्नात्मगामी फलाभिलापोऽयमपितु स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छेत्युक्तमेव । तस्मादुपदेशतत्त्वज्ञानयोरविरोधात् सन्दिग्धव्यतिरेकित्वाद्वचनमपि न सर्वज्ञताबाधकमिति न बाधकप्रमाणसद्भावस्तदभावव्यवहारसाधनम् । नापि साधक प्रमाणाभावः । तथाहि–प्रत्यक्षाभावो वा सकलप्रमाणाभावो वा स्यात् ? प्रत्यक्षाभावोऽपि आत्मनः सर्वेषां वा ? यदात्मनस्तदापि दृश्यताविशेषणो निर्विशेषणो वा ? न तावदात्मप्रत्यक्षाभावो दृश्यताविशेषणः सर्वज्ञताभावसाधनम्, तस्य स्वभावविप्रकर्षिण-

स्तत्त्वानुपपत्तेः। प्रसिद्धत्वान्निर्विशेषणस्य च व्यभिचारात्समस्त-प्रत्यक्षनिवृत्तेरेव असिद्धत्वात्। न खलु अर्वाग्दृशः सकलप्रत्यक्ष-निवृत्तिरसिद्धत्वात्। न च प्रमाणं प्रमेयस्य व्यापकं कारणं वा येन तन्निवर्तेत, तस्मान्न तदभावसिद्धिर्नापि तद्भावसन्देहस्तत्साधनेन तत्सद्भावस्य निवेदितत्वात्। तस्मादनुविधेयपुरुषधौरेयनियोगादेव प्रवृत्तिनिवृत्ती इति साम्प्रतम्।

तदेतन्मीमांसका न क्षमन्ते, यद्यप्यात्मप्रत्यक्षनिवृत्ति-विप्रकर्षवतां त्रिविधेन कालदेशविप्रकर्षेण तद्वतां राम-सुमेरु-परमाण्वादीनामभावं व्यभिचरति, सर्वप्रत्यक्षनिवृत्तिरसिद्धा। असर्वदृशोऽस्मदादेः सकलप्रमाणनिवृत्त्या नार्थाभावसिद्धिर-व्यापकनिवृत्तावव्याप्यनिवृत्तेरनियमादव्यापकत्वाच्चाहेतुत्वात्तन्मात्र-प्रतिभावाच्च, हेतुधर्ममात्रानुबन्धे हि साध्यधर्मेऽस्य व्यापकः, यथा वृक्षत्वं शिंशपात्वस्य। न च प्रमेयमात्रानुबन्धि-प्रमाणन्तस्माद-न्यथा प्रमेयानुबन्धिप्रमाणस्यास्मदादेः सर्वस्य सर्ववित्त्व-प्रसङ्गः। प्रमेयमात्रानुबन्धिप्रमाणशालिनी हि सर्वज्ञता। तथा सत्यविशेषोऽस्मदादीनां भवदभिमतेन सर्वविदा।

वचनादयश्च सर्वार्थतत्त्वविदो विपश्चिताश्च। विरोधस्तया सह वचने सत्त्वानां तथापि कारणनिवृत्त्या कार्यनिवृत्तिप्रतीति-र्नह्यस्ति सम्भवो नास्ति धूमकेतनोऽस्ति च धूम इति। प्रमाणञ्च करणं प्रमायाः, प्रमाणानुपपत्त्या तत्कार्यायाः सर्वार्थसंविदो-ऽभावमनुमिनीमहे। तथाहि—न प्रत्यक्षं चक्षुरादि जन्म सर्वार्थ-विषयं सम्भवति, चक्षुरादीनां विषयनियमात्। उद्भूतरूपादि-मद्वर्तमानमेव विषयः स्वभावविप्रकर्षवतां तद्विषयत्वप्रसङ्गा-दत एव किञ्चिदेवावयवि द्रव्यादीत्युक्तम्; तथापि कालव्यवहितं देशविप्रकृष्टञ्च तद्विषयः प्रसज्येत, अत एव संबद्धमित्युक्तम्। यद्यु-च्येत मानाभावादर्वाग्दृशां लोचनागोचरावतीतानागतौ योगविम-

लाञ्छनोज्ज्वलीकृतलोचनास्त्वालोचयिष्यन्ति सकृदेव जगदुदरवर्तिवृत्तवर्तिष्यमाणमर्थमात्रमचिन्त्यो हीन्द्रियाणां सामर्थ्यातिशयः प्रभावातिशयश्च योगस्य, यथा हि चक्षुरादीनां देशतः परिमाणतः संख्यातोऽनियमस्तथा कालतोऽपि माभूदिति। तदप्यकिञ्चित्करम्; यतो यथैव कार्यमहेतुकं न भवति कादाचित्कत्वव्याघाताद्यथानियतहेतुकमपि नानियतहेतुकत्वमहेतुकत्वाद् विशिष्यते, कारणस्य कार्यप्राग्भावनियमः कारणत्वं, तच्चानियतनिमित्तत्वेऽनुपपन्नं नहि जातु यवबीजमत्यन्तपरिकर्मितमपि कलमाङ्कुराय परिकल्पते, नानाकारणमेकं वृश्चिकादि जनयतीति तु स्थूलदृशः। कुशाग्रधियस्तु तत्रापि कमपि जातिभेदं पश्यन्ति, तस्माद्यथैव कारणान्तराणि स्वकार्यनियतसामर्थ्यानि स्वकार्याण्येव जनयन्ति स्वकार्ये एवातिशयमनुभवन्ति नाकार्ये नाप्यन्यकार्ये तथेन्द्रियाण्यपि न स्वाविषये, नाप्यन्यविषये। तदुक्तं जैमिनिमहर्षिणा—"विद्यमानोपलम्भनत्वात्।"

मानसमपि प्रत्यक्षं न सर्वं बोधयति, मनसो वहिरस्वतन्त्रत्वात्। रूपादौ मनसः स्वातन्त्र्येऽन्धबधिराद्यभावप्रसङ्गात्। न खल्वन्धादयो निर्मनस्कास्तेषां स्मृत्याद्यभावप्रसङ्गात्। यद्यप्युक्तमादरनैरन्तर्यदीर्घकालासेविता भावना करतलामलकायमानालम्बननिर्भासिविज्ञानफला भवति, यथा कामातुरस्य कामिनी भावनोक्तविशेषणत्रयवती कामिनीविषयविज्ञानविशदाभताहेतुस्तथैव सकलानेव दुःखिन आत्मतयाभ्युपगच्छतां दानादिपारमिताभ्यासतनूकृतान्तमेलानां विशेषणत्रयोपेतया भावनया सर्वतत्त्वज्ञानं नासम्भवम्। न च भावनाप्रकर्षजं ज्ञानं भ्रान्तं प्रमाणसिद्धविषयत्वात्। समस्तवस्तुविषयं च तन्नैरात्म्यसाक्षात्काररूपत्वाद्विश्वनैरात्म्यवैशद्यं विश्ववैशद्यमेव। तदप्यसङ्गतम्; यतो भावनामयमपि विज्ञानं श्रुतानुमानविषयमकस्माद् भावनाऽयोगादागमानुमानपर-

तन्त्रमेव पूर्वज्ञानभूतार्थविपर्ययानुविधानात्सापेक्षत्वादप्रमाणमेव । न ह्यनुमानेन वह्निं व्यवस्थाप्य भावयतो वह्निविषयं विशदं विज्ञानं तत्प्रमाणमिन्द्रियसन्निकर्षजन्यस्य वह्निविज्ञानस्य भावनाधेय-विशदाभविज्ञानेन सह सम्भवादनियमप्रसङ्गात्, बाहुल्येन विसंवादोपलम्भात् । न च भगवतो बुद्धस्य निर्मृष्टानखिल-क्लेशोपक्लेशमलं विज्ञानमनावरणं परितः प्रद्योतमानं स्वालम्बनं प्रत्ययं सर्वाकारं गोचरयन्तस्य साक्षात्परम्परया वा सर्वेण सम्ब-न्धाद् देशकालविप्रकीर्णवस्तुविशिष्टस्वभावतया तथैव गोचरयेत् । न च सर्वग्रहणमन्तरेणेति सर्वविषयमस्य विज्ञानमनावरणं सिद्धम् । तदेतदप्यनुपपन्नम्; रागादिमलानां तत्त्वावरकता तदपगमे तत्त्वप्रतिभानसम्भवेऽपि न सर्वप्रतिभानं सम्भवति, भावना-प्रकर्षजमपि विशदाभमपि प्रत्यक्षमर्थव्यभिचारनियमाभावात् संशयाक्रान्तत्वादप्रमाणमेव तत् ।

सदर्थप्रकाशनं बुद्धेः स्वभावोऽसदर्थत्वं त्वागन्तुकमित्यसति बाधके सद्विषयकत्वमेवेति चेन्न । अनुमितभावितवह्निविषयविशदा-भविज्ञानादिप्रामाण्यप्रसङ्गात्तद्विषयस्य क्वचिद्बाधदर्शनादप्रामाण्य-मिहापि समानम् । तदिह विशेषणत्रयवत्या भावनया विशदाभवि-ज्ञानहेतुत्वसाधने सिद्धसाधनम् । भवतु तथागतस्तथाभूतविज्ञान-वानतत्त्वे तद्विज्ञानमस्य प्रत्यक्षमप्रमाणत्वात् ।

यदुच्यते—

"निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः ।
न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः ॥"—इति ।

तदप्यकिञ्चित्करम्; भूतार्थत्वे हि बुद्धेस्तत्पक्षपातिता भूतार्थस्य प्रतिपक्षैर्बाधो न भवेत् । अभूतार्थात्वियं स्वात्माभावमापन्नाऽप्या-त्मीयदृष्टिरिव सम्भवद्बाधा । तस्माद्यथा कामातुरस्य कामिनी-

विज्ञानमप्रमाणं तथैव भावनाप्रकर्षपर्यन्तजं ज्ञानमप्यप्रमाणमेव; अत एवाप्रत्यक्षमपि तत् । न चात्र रागाद्यावरणविरहो विशेषः न खल्वेते रागादयः कम्बलादिवदावरका विज्ञानस्य, किन्तु तदाक्षिप्तमना विविधविषयभेदतृष्णादिपरिप्लुतो न शक्नोति भावयितुमिति भावनादरमात्र एव रागादिविरहोपयोगः । अस्ति चेहापि शिशिरतरसम्भूतजडिममन्थरतरकायकाण्डस्यानुमितवह्निभावनाभियोग इति न हेतुभेदः ।

यदुक्तम्—"न कालतो नियमश्चक्षुरादीनामवर्तमानरजताद्युपलब्धेः । न हि सा शुक्तिकाद्युपलब्धिरन्याकारसंविदोऽन्यविषयत्वायोगादनाश्वासाच्च । अधिगतस्वातन्त्र्यञ्च मनः स्वप्ने । न च स्वप्नज्ञानं स्मृतिरतद्रूपत्वात् । तदप्यकिञ्चित्करम्; वर्तमानशुक्तिशकलादेरविषयत्वे तदसन्निधावपि रजतादिवेदनप्राप्तेरेवं रजतावभासनं यदि शुक्तिविषयं न स्यात्तदाऽवर्तमानगोचरमेव तदवभासनं प्रतीयेत । तदा हि तद्रजतमित्यतीतगोचरतयैव प्रवर्तेत, नेदं रजतमिति । तथा च तत्प्रेप्सवो न प्रवर्तेरन्, अतीतस्य प्राप्त्यसम्भवान्न खल्वतीतं तत्तयाऽवगम्य शब्दाद्वदान्यश्रेष्ठं युधिष्ठिरं क्षुत्क्षामोऽपि भिक्षुको याचितुमर्हति स्वप्ने बाह्यार्थस्य ग्राह्यस्याभावान्न बहिर्मनसः स्वातन्त्र्यमि"ति न्यायकणिकायां विस्तरः ।

ननु श्वो मे भ्राता आगन्ता इत्यादि लौकिक्यां प्रतिभायासर्थेलिङ्गाद्यपेक्षाभावात् बहिः स्वतन्त्रं मनो दृष्टम् । ननु तत्र भ्रातुः स्वरूपस्य प्रागुपलब्धेर्भवत्वेवम्, तथापि देशकालावस्थाविप्रकीर्णानां विश्वेषां भावानां न रूपतोऽप्युपलम्भसम्भव इति कथमत्र मनसः स्वातन्त्र्यमिति चेन्न । द्रव्यादीनां, प्रकृतिपुरुषयोः, पञ्चस्कन्धानाञ्च लोकप्रमाणवशेन मनसा विषयीकृतत्वेन भावनामयस्य स्फुटावभासस्य लोकोत्तरस्य प्रत्यक्षस्य विषयत्वेन सार्वज्ञ्यसिद्धिसम्भवात् । लौकिकेन प्रमाणेन निष्प्रकारकं सप्रकारकं वा एवं

गृहीत्वा भावयतो भावनाऽपनीतावरणं मनः स्वातन्त्र्येण सर्वमेव गाहते। तदसत्; लोकोत्तरप्रतिभानस्यासिद्धत्वात्।

लौकिकन्तु प्रियाप्रियगोचरं ज्ञानं न स्वतन्त्रमनोजन्यम्। यतः सह प्रवृत्तहृदयप्रसादोद्वेगादिलक्षणलिङ्गाद्याभासप्रभवत्वेन न निश्चयात्मकम्, उभयकोटिसंस्पर्शस्यातुल्यत्वात्। नापि संशयात्मकम्। ननु यदि न संशयो नापि निश्चयस्तर्हि प्रतिभैव तत्। न चैतद्विज्ञानं तुल्यवदुपप्लवमानविरुद्धकोटिद्वयविषयो येन संशयात्मकम्। नाप्येककोटिविषयामपि प्रमामवधारयति येन निश्चयः स्यात्। न चैककोटिविषयं न प्रकाशते, येन न स्यात्। तस्मात् सिद्धं प्रतिभैवेति।

तर्हि स्वयमनिश्चयात्माऽपि निश्चयजननादस्तु प्रमाणम्, चक्षुरादिवत्। तदपि न; साम्प्रतमनिश्चयफलत्वात् प्रमाणान्तरापेक्ष-निश्चयत्वाच्च।

योगजाद्धर्मात् सर्वार्थेषु मानसं प्रत्यक्षमित्यपि न सङ्गतम्। सन्निकर्षोपायत्वात् सिद्धेः, संयुक्तसंयोगानभ्युपगमात्। अन्यथा कुड्यादिव्यवहिताऽर्थोपलब्धिप्रसङ्गः! अनुमानेऽपि प्रत्यक्षत्वा-पातात्। अजातातिवृत्तेषु तस्याप्ययोगात्। अत एव नेन्द्रियार्थयोः सिद्धयोः सन्निकर्षः। अतीतानागतानां तदाप्यसत्त्वादव्यवहितार्थो-पलब्धिप्रसङ्गाच्च।

कालत्रयपरिवृत्त्यर्थगोचराणि मानान्तराणि, वर्तमानविषयन्तु प्रत्यक्षम्, तत्र अतीतानागतान् वर्तमानात्मना पश्यतो मिथ्याज्ञान-मेव सर्वस्यातथात्वात्। यथार्थन्तु पश्यतो न प्रत्यक्षं तस्यातीतानागत-विषयत्वाभावात्। भिन्नलक्षणानामपि प्रत्यक्षत्वेऽनुमानादीनामपि प्रत्यक्षत्वप्रसङ्गः। न चाक्षजत्वं प्रत्यक्षस्य लक्षणम्, तच्च मनोजन्ये सर्वज्ञप्रत्यक्षे सम्भवत्येवेति वाच्यम्। तथात्वे मनोजन्येऽनुमाना-दावतिप्रसङ्गात्। तस्मादिन्द्रियार्थसन्निकृष्टार्थजत्वमेव प्रत्यक्षलक्षणं

वाच्यम्। मनसश्चेन्द्रियत्वेन तज्जन्यसुखादेः प्रत्यक्षत्वमर्थसामर्थ्य-जन्याभावेन च नानुमानादावतिप्रसङ्गः। सूक्ष्मविप्रकृष्टव्यवहितानां ज्ञानोत्पत्तौ सामर्थ्याभावात्।

कल्पनापोढत्वं प्रत्यक्षलक्षणमित्यपि न समञ्जसम्। कल्पनाया अनिरूपणात्। न च ? शाब्दाभासा प्रतीतिः कल्पनाशब्दविषये श्रोत्रज्ञानेऽव्याप्तेः। न वाऽभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः सा, सामान्याकारस्वसंवेदनेऽप्यप्रत्यक्षत्वात्। अवस्तुनि वस्त्वन्तर-योजना कल्पना, इत्यपि न साम्प्रतम्। तथा सति सामान्याकार-प्रतीतेः प्रत्यक्षत्वं स्यात्। सामान्यस्य वस्त्वन्तरस्यानभ्युपगमात्। अभिधानयोजना कल्पनेत्यपि न; अव्युत्पन्नाभिधानस्य तथात्वापत्तेः।

यत्तूक्तं सर्वमेव प्रत्यक्षमसन्निहितावभासम्, अर्थज्ञानयोः कार्य-कारणभावेन कालभेदात्। न च तर्हि "सर्वैकदेशस्यापि कश्चित प्रत्यक्षदर्शी भवेत् कुतः सर्वदर्शी। ननु ज्ञानाकारेऽर्थे वेदनाध्यव-सायेनैव व्यवहारदर्शनान्नार्थहानिरिति चेन्न। अन्यवेदनेऽन्याध्यव-सायानुपपत्तेः। ननु निरूढत्वादनादेरर्थग्रहाभिनिवेशापस्मारलक्ष-णाया अविद्याया माहात्म्यात्तत्सम्भव इति चेत; स्वस्ति सर्वज्ञत्वाय भूयिष्ठाऽविद्यापस्माराय। वरं कनीयोऽविद्यमेकदेशदर्शित्वमेव। न हि स्वाकारमनर्थमप्यध्यवस्यन्ननन्योपायतयाऽपि भवत्यभ्रान्तः। न च भ्रान्तत्वं न्यायसिद्धं समस्तप्रत्यक्षभ्रान्तत्वभिया शक्यमपह्नोतुम्, प्रमाणसिद्धस्य प्रयोजननिरोधेनाशक्यनिह्नवत्वात्। ग्राह्यत्वं हेतुत्वमेव ज्ञानाकारार्पणक्षममिति न पुनः सर्वं तस्याहेतुत्वाद् देशतः कालतो वाऽसन्निधानात्। अन्यथा सर्वस्य सर्वदर्शित्व-प्रसङ्गात्।

अपि च सर्वं न क्रमेण शब्दावगममानन्त्यादेव, न वा यौग-पद्येनानन्त्यादेव।

नैयायिकादयस्तु सर्वज्ञं जगत्कर्तारं परमेश्वरं प्रसाध्य तत्कर्तृकत्वेन वेदस्यैव धर्माधर्मादौ प्रामाण्यं साधयन्ति। तथा वार्तिकतात्पर्ये वाचस्पतिमिश्रा वेदप्रामाण्यं सम्भावयन्ति। सम्भावनायास्तद्धेतुत्वात्। तदुक्तम्—

'सम्भावितप्रतिज्ञायां पक्षः साध्येत हेतुना।
न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः॥''—इति।

परमेश्वरस्य परमदयालोः प्रत्यक्षीकृतहेयोपादेयस्य अतएवापास्तभ्रमप्रमादकरणापाटवादिसमस्तपुन्दोषसामान्यस्य भूतोद्दिधीर्षया यथार्थचिख्यापयिषया वेदनिर्मातृत्वम्। प्राणिसुखदुःखादिवैचित्र्यान्यथानुपपत्त्या कारणवैचित्र्यं कल्प्यते। तच्च दृष्टभिन्नमदृष्टापूर्वधर्माधर्मादिशब्दितम्। तच्च न कस्यचिज्जीवस्य प्रत्यक्षमतीन्द्रियत्वात्। परमेश्वरश्च तनुभुवनादिलक्षणकार्यस्य कर्तृत्वात्तन्निर्माणानुकूलतत्त्वज्ञानचिकीर्षाकृतिमत्त्वेन क्लेशकर्मविपाकाशयैरपरामृष्टत्वेन सर्वज्ञः सर्वसमर्थः परमकारुणिकश्चेति।

ननु भुवनादिकार्यादेवानुमीयते। सोऽयमात्मीयहिताहितप्राप्तिपरिहारोपायान विदुषोऽनेकविधदुःखदहनदह्यमानानवलोकयन् कथं न तप्येत, तप्यमानश्च हिताहितप्राप्तिपरिहारोपायतत्त्वं विद्वान् कथं नोपदिशेत्; कथं वान्यथोपदिशेत्? तस्मादनेन प्रजाः सृष्ट्वा ताभ्यो हिताहितप्राप्तिपरिहारोपायोऽवश्यमुपदेष्टव्यः। न ह्ययमनुपदिश्य स्थातुमर्हति, प्रजानां पितृकल्पस्यास्योपदेशादेवर्षिदेवर्षिमनुष्यगोचरश्चातुर्वर्ण्येन चातुराश्रम्येणादराद् ग्राह्यो धार्यश्च। तस्माद् वर्णाश्रमाचारव्यवस्थापको महाजनपरिगृहीतो वेदस्तत्प्रणीत आप्तोक्तत्वान्मन्त्रायुर्वेदवत् प्रमाणमेव। न तथा शाक्यदिगम्बरसंसारमोचकादीनामागमाः ईश्वरप्रणीता बुद्धर्षभादीनां तत्प्रणेतृत्वस्य स्फुटतरत्वात्। न च शौद्धोदनिप्रभृतयो विश्वकर्तारो येन सर्वज्ञा भवेयुः। न च

सम्भावनामात्रेण तत्प्रणीतेष्वागमेषु प्रेक्षावतामाश्वासो युक्तः। न चैतेषामागमा वर्णाश्रमाचारव्यवस्थाहेतवः। नो खलु निषेकाद्याः क्रियाः श्मशानान्ताः प्रजानामेते विदधति। बौद्धाद्यागमानुसारिणोऽपि श्रुतिस्मृतिपुराणादीनुपजीव्यैव व्यवहरन्ति। सांवृतमिति प्रलपन्तोऽपि अश्वघोषादयो बुद्धचरिते पुराणेतिहासाद्याश्रया एव कथा विपर्यस्तरूपेणोद्धृतवन्तः। तस्माद्वेदेषु जगन्निर्मातृकर्तृकत्वस्मृतिर्भवेद्वा मा वा, त एव त्वीश्वरप्रणीता इति पश्यामः।

न चैते चैत्यवन्दनादिवाक्यवदन्यकर्तृकाः स्मर्यन्ते। नान्य आगमो लोकयात्रामुद्वहन् महाजनपरिगृहीत ईश्वरप्रणीततया स्मर्यमाणो दृश्यते। तस्माद्वेदा एवेश्वरप्रणीताः, त एव त्रैवर्णिकैरद्य यावत्प्रयत्नेन गृह्यन्ते धार्यन्ते च। तदर्थपालनायाञ्च महर्षिपरम्पराभिरङ्गोपाङ्गेतिहासपुराणधर्मशास्त्राणि प्रणीतानि। बुद्धादिवाक्यानि न तथाभूतानि। न चैतेषां मन्वादिवाक्यवद् वेदमूलकत्वेन प्रामाण्यम्। वेदनिन्दकबुद्धवाक्येषु वेदमूलकत्वानुमापकलिङ्गाभावात्। तत्सर्वज्ञत्वसंशयेन चानुभवमूलकत्वस्य च वक्तुमशक्यत्वात्। प्रवृत्तिसामर्थ्यानुमितप्रामाण्येषु मन्त्रायुर्वेदवैदिकशान्तिकपौष्टिकादिकर्माभ्यनुज्ञानात्। रसायनाधिकृत्यारम्भे च वेदविहितचान्द्रायणादिप्रायश्चित्तोपदेशादाप्तप्रणीतेनायुर्वेदेन वेदानां प्रामाण्याभ्युपगमाद् वेदानां प्रामाण्यमेव।

अत्रानुमानमपि—"मन्त्रायुर्वेदवाक्यानि सर्वज्ञकर्तृकानि, महाजनपरिगृहीतत्वे सत्यलौकिकार्थप्रतिपादकत्वात्।" यानि तु न सर्वज्ञपूर्वकाणि तानि नैवंरूपाणि, यथा बुद्धादिवाक्यानि। तान्यलौकिकार्थान्यपि न महाजनपरिगृहीतानि।

मन्त्रायुर्वेदानां सत्यपि प्रवृत्तिसामर्थ्ये तासां तासामोषधीनां

तत्संयोगभेदानाञ्च तत्तदक्षरावापोद्धारभेदस्य च नासर्वज्ञः सहस्रेणापि पुरुषायुषैः शक्तः कर्तुम्।

सर्वज्ञेश्वरसम्बन्धे न्यायकणिकायाम्—"सर्वकार्याणां तनुभुवनादीनामुपलब्धिमान् कर्ता प्रतीयमानोऽन्तर्भावितसर्वज्ञत्व एव प्रतीयते। प्रदीप इवान्तर्भावितप्रभावितानः स्वप्रमाणत्वात्। न च भवतु कर्तृत्वं मा भूच्च सर्वज्ञत्वमिति वाच्यम्। लोके तथा दर्शनात्। दृश्यन्ते हि उपादानोपकरणसम्प्रदानप्रयोजनाभिज्ञाः कुलालादयः कर्तारः। प्रकृते चेश्वरेणापि जगत्कर्त्रा परिमेशित्रापि उपादानाद्यभिज्ञेन भाव्यम्। तत्रोपादानं परमाणुजातिचतुष्टयम्, उपकरणं समस्तक्षेत्रज्ञसमवायि-धर्माधर्माः, सम्प्रदानं क्षेत्रज्ञः, प्रयोजनं भोगापवर्गौ। एतत्सर्वाभिज्ञत्वं नासर्वज्ञतायामुपपद्यते। तदेतदसाम्प्रतम्; दृष्टान्तानुपपत्तेः। तथा हि—किं कुलालादयः स्वकार्यस्य निरवशेषोपकरणादिवेदिनः सावशेषवेदिनो वा? नाद्यः; सर्वकार्याणां निमित्तहेतोरदृष्टस्यापरिज्ञानात्, सम्प्रदानप्रयोजनविशेषाणामपरिज्ञानाच्च। अथोपकरणादिमात्रज्ञानं न समस्तोपकरणादिज्ञानं कुलालादीनाम्। तर्हि तयैव रीत्या परमेश्वरस्यापि स्वकार्योपकरणादिमात्रज्ञानमिति न सर्वज्ञतासिद्धिः, किन्तु कतिपयज्ञतैव स्यात्। अपि च बालोन्मत्तादयो न कार्यस्योपकरणादिवेदिनः। निरभिप्रामाणां तत्र प्रवृत्तिदर्शनात्। न च कुलालादयो निदर्शनम्, न बालादय इति नियमहेतुरस्ति।

यदि तत्कर्तृत्वं साध्यम्, तर्हि कथमन्तर्भावितसर्वज्ञत्वं हेतुमन्तरेण सेत्स्यति। ननु सिद्धमेव तत्सन्निवेशादिमतां बुद्धिमत्पूर्वकत्वम्। न। लोके हि प्रासादाट्टालगोपुरतोरणादयश्चेतनकर्तृकाः प्रसिद्धाः, परमाण्वाकाशादयश्चाकर्तृकाः प्रसिद्धाः, सन्दिग्धचेतनकर्तृकाश्च तनुमहीरुहादयस्तत्र विवादाध्यासितोपलब्धिमत्कर्तृकाः कार्यत्वादचेतनोपादानत्वाद्वा, यत्कार्यमचेतनोपादानकं वा तत्सर्वमुपल-

ब्धिमत्पूर्वकम्, यथा—प्रासादादिकम्। तथा चैते तनुभुवनादयस्तस्मात्तेऽप्युपलब्धिमत्कर्तृका महत्त्वे सति क्रियावत्त्वेन वस्त्रादिवत्पृथिव्यादीनां कार्यत्वसिद्धिः।

ननु कार्यजातस्य क्रमजत्वेन कर्मणश्चेतनहेतुत्वेन च जगतस्तत्कारणत्वाभ्युपगमेनोपलब्धिमत्पूर्वकत्वमात्रसाधने सिद्धसाधनम्, सर्वज्ञपूर्वकत्वसाधने तु तेन हेतोर्व्याप्त्यसिद्धिर्दृष्टान्तश्च साध्यहीनः, कुलालादीनामसर्वज्ञत्वात्। कुम्भादौ उत्पत्तिमत्त्वस्याचेतनोपादानत्वस्य वाऽसर्वज्ञपूर्वकत्वेनैव व्याप्त्युपलब्धेर्विरुद्धता च। न चोपलब्धिमत्पूर्वकत्वमात्रं साधनविषयस्तद्विशेषस्य च सर्वज्ञपूर्वकत्वात्तद्विषयस्यापि ततः सिद्धिरिति साम्प्रतम्, साधनाव्याप्तस्य विशेषस्य तदसिद्धेः। यदि सिद्ध्येत् कथमनुमानाविषयः, विषयत्वे वा कथं न पूर्वोक्तदोषसंस्पर्श इति चेन्न। सामान्यमात्रव्याप्तावप्यन्तर्भावितविशेषस्यैव सामान्यस्य पक्षधर्मतावशेन साध्यधर्मिण्यनुमानेन तददोषात्। अन्यथाऽनुमानमात्रच्छेदप्रसङ्गः। तथा हि—वह्न्यनुमानमपि न वह्निसामान्यमात्रविषयम्, तस्य प्रागेव सिद्धत्वात्। न तावद्विशिष्टपर्वतविषयं वह्नित्वसामान्यस्य तत्सम्बन्धाभावेन तद्विशेषणत्वानुपपत्तेः; वह्नित्वस्य वह्निमात्रसम्बद्धस्य तद्भिन्ने पर्वतादावसम्बन्धः स्पष्ट एव। अन्यथा गोत्वसमवायाद्यथा शावलेयादयो गावस्तथैव वह्नित्वसमवायात्पर्वतोऽपि वह्निर्भवेत्। न च वह्नित्वस्य पर्वतेन सह संयुक्तसमवायसम्बन्धोऽस्त्येवेति वाच्यम्। तथात्वेऽपि पर्वतसंयुक्तवह्निविशेषप्रतिपत्तिमन्तरा न तत्प्रतिपत्तिः सम्भवति इत्यायातं वह्निविशेषस्याप्यनुमानम्। तथा च पूर्वोक्तदोषप्रसङ्गः।

एवमेव यद्यपि इन्द्रियकरणिका काचित्क्रिया नोपलब्धा, छिदादयश्च क्रिया नेन्द्रियसाधनाः कुठारादीनामनिन्द्रियत्वात्। रूपादिपरिच्छेदरूपाः क्रियाश्च न कुठारादिसाधनाः, तस्माद्यथैव

क्रियात्वसामान्यस्य सत्यपि करणमात्राधीनत्वव्याप्तत्वे पक्षधर्मतावशेन इन्द्रियलक्षणकरणविशेषसिद्धिर्भवति, तथैवोत्पत्तिमत्त्वस्याचेतनोपादानत्वस्य चोपादानोपकरणसम्प्रदानप्रयोजनज्ञकर्तृत्वमात्रव्याप्तत्वे विवादाध्यासितेषु तनुभुवनादिषु पक्षधर्मताबलेन तद्विशेषस्य सर्वज्ञ-कर्तृत्वस्य सिद्धिः, अन्यथा सामान्यस्य व्यापकाभिमतस्यासिद्धिः स्यात्। निर्विशेषस्यासम्भवाद्विशेषस्य चान्यास्यानुपपत्तेरसर्वज्ञस्य अदृष्टादिभेदविज्ञानरहितस्य जगत्कर्तृत्वासम्भवात्। तथा च यद्यप्युपलब्धिमत्कर्तृत्वं व्याप्तिविषयस्तथापि तद्विशेषस्य पक्षधर्मताबलात् प्रतिलम्भ इति विशेषविषयमनुमानं पर्यवस्यति। न च पूर्वोक्तदोषप्रसरस्तस्य साध्यदृष्टान्तयोर्धर्मत्वात्। उत्कर्षापकर्षानुयोगस्य सर्वानुमानसाधारण्येनानुमानमात्रप्रामाण्यकप्रतिज्ञेयहेतुत्वात्। तस्मात्सिद्धं विवादाध्यासिता उपलब्धिमत्कर्तृका इति।

न च सकलक्षेत्रज्ञसमवायिधर्माधर्मज्ञानकारणाभावेन कथं परमेश्वरस्य तज्ज्ञानमिति वाच्यम्; परमेश्वरसमवेतज्ञानचिकीर्षाप्रयत्ननित्यत्वेन कारणानपेक्षत्वात्। न च तत्र तत्रानित्यानामेव बुद्ध्यादीनां दर्शनेन कथं तन्नित्यत्वमिति साम्प्रतम्; अनन्तत्वात्। अन्यथा पार्थिवादीनां रूपादीनां कार्याणामुपलब्धेस्तोयादिपरमाणवोऽपि न रूपादिमन्तो भवेयुः, तेषां कार्यत्वात्। यदि च हिमकरकादौ रूपादिदर्शनात्कार्यद्रव्यगतानां तेषां कारणगुणक्रमेण भावात् पाथसीयपरमाणूनामपि रूपादिमत्ता सदा कारणतया च तद्गतानि रूपादीनि नित्यानीति, तर्हीहापि कार्यत्वेनाचेतनोपादानत्वेन समस्तविषयज्ञानानुमानात्तस्य च सदा कारणतया तन्नित्यत्वसिद्धेः समानत्वात्। परपुरुषसमवेतावपि धर्माधर्मावधिष्ठातुं शक्नोत्येव परमेश्वरः सम्बन्धात्। न च संयोगसमवाययोरभावेन कस्तत्र सम्बन्ध इति वाच्यम्,

साक्षात्संयोगसमवायाभावेऽपि संयुक्तसंयोगिसमवायसम्बन्धस्य सद्भावात् । परमेश्वरेण संयुक्ताः परमाणवस्तैश्च क्षेत्रज्ञास्तत्सम-वेतौ च धर्माधर्माविति संयुक्तसंयोगिसमवायसम्बन्धः संयुक्त-समवायो वा क्षेत्रज्ञैरीश्वरस्य संयोगसम्बन्धः, तैश्चधर्माधर्मयोः समवायसम्बन्ध इति तदुपपत्तिः । न च तदसिद्धिः; ईश्वरः क्षेत्रज्ञसंयुक्तो मूर्त्तद्रव्यसंयोगित्वाद् घटादिवत् । स चास्य संयोगोऽन्यतरोभयकर्मसंयोगानां तत्कारणानामभावादजन्यः । कार्यारम्भाभिमुख्यमेव धर्माधर्मयोः प्रवृत्तिः, सा च देशकालादि-वदीश्वरप्रयत्नमप्यपेक्षते । न च धर्माधर्मौ परमाणून्वा स्वधर्मानुप-गृहीतान् कथमीश्वरः प्रयत्नेन प्रेरयतीति वाच्यम्, विषविद्या-विदा स्वधर्मानुपगृहीतस्य विषशकलस्य प्रेरणवत्तदुपपत्तेः । एवमीश्वरीयज्ञानेच्छाप्रयत्नानां नित्यत्वसिद्धौ शरीरग्रहणमपि तस्य नापेक्षितम्, तन्मात्रादेव परमाणूनामदृष्टादीनाञ्च प्रवृत्तौ शरीरपृथिव्यादिलक्षणस्य कार्यस्योत्पत्तेरुपपत्तेः । न च नेश्वरः कर्ता क्षित्यङ्कुरादीनां प्रयोजनाभावात्, तथा नेश्वरविज्ञानं नित्यं विज्ञानत्वादित्यादिप्रत्यनुमानानीति वाच्यम्; ईश्वरस्य तज्ज्ञानस्य च धर्मिणोऽप्रसिद्धौ हेतोराश्रयासिद्धत्वात् । तत्सिद्धौ कर्तुर्नित्य-ज्ञानस्येश्वरस्य च धर्मिग्राहिणोऽनुमानादेव सिद्धेस्तद्विरोधान्नोक्त-प्रत्यनुमानसिद्धिः ।

न चाज्ञातरूपाणामिन्द्रियमनसां विज्ञानोत्पत्तिं प्रति साधन-भावस्य वत्सविवृद्धिनिमित्तस्याचेतनस्य क्षीरस्य स्वातन्त्र्येण प्रवृत्तेश्च, वनविटपिनाञ्च विना प्रयत्नमुत्पादस्य दर्शनाद्व्यभिचार इति साम्प्रतम्; सर्वेषामेव तेषां विवादास्पदत्वेन पक्षकुक्षौ निक्षिप्तत्वात् ।

न चानुपलम्भाच्छशशृङ्गतुल्यता परमेश्वरस्येति वाच्यम्; वैष-म्यात् । न च शशशृङ्गास्तिता, तदनुपलब्धिविरोधाद्भगवतस्त्व-

परोक्षानर्हस्य तद्विरोधानुपपत्तेः, अन्यथा सर्वानुमानोच्छेदप्रसङ्गः। शृङ्गस्य तु शशशिरोवर्तिनो गवादिगतस्येव दर्शनार्हस्यानुपलब्धि-निराकृतस्य साधनानर्हत्वात्। न च पक्षेण व्यभिचारः; सर्वत्र तस्य सुलभतया सर्वानुमानोच्छेदप्रसङ्गात्। एवं नित्येतरत्समस्तं सर्वज्ञपूर्वकमुत्पत्तिमत्त्वादचेतनोपादानत्वाद्वा, यन्न सर्वज्ञपूर्वकं न तदुत्पत्तिमदचेतनोपादानं वा, यथा परमाण्वादि, न चेदं तथा, तस्मात्सर्वज्ञपूर्वकमिति।

लोके देशकालप्रतिप्रसवं कार्यमुपलभ्यते। यदि चेतनानधिष्ठितानि स्वं कार्यं कुर्युस्ततो यत्र क्वचनावच्छिन्नानि कार्यं जनयेयुरिति न देशकालप्रतिनियतप्रसवमुपलभ्येत। तेन चेतनाधिष्ठितैरेव कारणैः कार्यं जन्यत इति मन्तव्यम्। हेतुसमवधानेन कार्यं जन्यते न प्रत्येकं कारणैर्जन्यत इति कारणसमवधायकतयापि-चेतनाधिष्ठितानामेव कारणानां कार्योत्पादकत्वम्।

ननु कादाचित्कपरिपाकाददृष्टविशेषादेव कारणसमवधानमिति चेन्न। तस्याचेतनत्वेन कारणसन्निधापकत्वासम्भवात्। न खलु यत्र क्वचिदव्यवस्थितानि दण्डादीनि विना कुलालप्रयत्नमदृष्टविशेषादेव परस्परं सन्निधीयन्ते, सन्निहितानि वा कार्यस्येशते। तस्मात्कारणसमवधानव्याप्तत्वात्कार्योत्पादस्य तस्य चोपलब्धिमत्पूर्वकत्वाभावेऽनुपपत्तेः। व्यापकनिवृत्त्या तद्व्याप्यकार्योत्पादस्यापि निवृत्तेः। यदुक्तमीश्वरज्ञानमप्रत्यक्षमिन्द्रियार्थसन्निकर्षानुत्पादादित्यादि। तदप्यकिञ्चित्करम्; निखिलार्थसाक्षात्कारित्वरूपस्य प्रत्यक्षलक्षणस्येश्वरप्रत्यक्षे सत्त्वात्। "अत्रैवैतस्य वाऽक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत" इत्याद्याम्नायवचनान्यपि मानम्। ईश्वरज्ञानं शरीरेन्द्रियाद्यनपेक्षमेवेत्यत्रापि 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः' इत्यादिश्रुतिवचनानि।

तदेतदपि मीमांसका दूषयन्ति। तथा च तेषामिदमाकूतम्—'न पक्षधर्मतावशात्क्षित्यङ्कुरादिकार्यदर्शनेन सर्वज्ञः कर्तृविशेषः सिद्ध्यति। नहि कस्यचित्सर्वज्ञत्वमात्रेण विश्वं कार्यमुत्पत्तुमर्हति। ज्ञानचिकीर्षाप्रयत्नसमुदायमन्तरा तदसिद्धेः। न ह्युपादानाद्यभिज्ञोऽप्यलसः कुलालो ज्ञानादिसमुदायमन्तरा कुम्भोत्पादने समर्थः। यथा केवलाद्वह्नेः केवलाद्वाऽऽर्द्रेन्धनाद्धूमो नोत्पद्यते, किन्तु तदुभयसमुदायादेव तज्जन्म भवति, तथैवाऽत्रापि प्रत्येतव्यम्।

न च पृथग्जनज्ञानविलक्षणमीश्वरज्ञानमसहायमेव विश्वकार्ये पर्याप्तम्; स्वरूपातिशयस्यैव सहायत्वे केवलादपि वह्नेर्धूमोत्पत्तिप्रसङ्गात्। ननु क्षेत्रज्ञगतधर्माधर्मौ परमाणवश्च सहायाः सन्त्येवेति चेन्न तैरेव कार्योत्पत्त्युपपत्तौ ज्ञानानपेक्षत्वप्रसङ्गात्। न चाविज्ञातास्ते न प्रवर्तन्त इति ज्ञानमपीष्यते, कुम्भाद्युपायेषु तथोपलम्भादिति वाच्यम्। ज्ञानवच्चिकीर्षाप्रयत्नयोरप्यपेक्षाया वक्तव्यत्वात्। तत्रापि ज्ञानं चिकीर्षाविशेष उपयुज्यते, स च प्रयत्नभेद उपयुज्यत इति प्रयत्नहेतुर्भेद एव साक्षात्कारोदये हेतुरिति कथं तमन्तरेण तत्सम्भवः? नहि वह्निमन्तरेण तुषप्रक्षेप फूत्कारमात्रादेवौदनः सिद्ध्यति। यद्युच्येत चिकीर्षाप्रयत्नावपि विद्येते एव परमेश्वरे। तत्रेदं वक्तव्यम्; तौ नित्यावनित्यौ वा? नित्यौ चेत्कृतमीश्वरस्य ज्ञानेन, चिकीर्षाप्रयत्नोत्पादानुपयोगिना तयोर्नित्यत्वेन तदनपेक्षणात्। न च प्रयत्नवज्ज्ञानमपि साक्षात्कार्योत्पादाङ्गम्, प्रयत्नभेदेन खल्वयमधितिष्ठत्युपादानादि।

ननु ज्ञानस्य चिकीर्षाया वा निष्पादितक्रिये कर्मण्युपयोगोऽविशेषाधायिनः साधनस्य साधनत्वान्यायातिपातात्। तथा चेश्वरस्य सर्वज्ञता दत्तजलाञ्जलिः स्यात्। यद्यनित्यौ, ततस्तयोरुत्पत्तिकारणं वक्तव्यम्। न च नित्यज्ञानमेव मूलकारणं नापरेण कारणेनार्थ इति वाच्यम्; तदनुपपत्तेः। आत्ममनः संयोग-

विशेषासमवायिकारणौ चिकीर्षाप्रयत्नौ न ज्ञानमात्रादुपपन्नौ भवितुमर्हतस्तथा सत्यतण्डुलादपि मण्डं सेत्स्यति। नन्वीश्वरस्य मुक्तात्ममनोभिः संयोगास्तत्सहायाः सन्त्येव, तेन चिकीर्षाप्रयत्न-प्रचयो युगपदुत्पद्यते तत्कार्योत्पादायेति चेन्न। विकल्पासहत्वात्। तथाहि—किमु मनांसि तत्संयोगाश्चानधिष्ठितान्येव चिकीर्षाप्रयत्नौ जनयन्त्युताधिष्ठितानि? नाद्यस्तैरेव व्यभिचारात्। नान्त्यः प्रयत्न-मन्तरेण चिकीर्षान्तरजन्मना तदधिष्ठानमपि न वक्तुं युक्तमनव-स्थानात्। अनादित्वान्नानवस्थादोष इति चेन्न। यतो यथोत्पन्न-सञ्जिहीर्षः परमेश्वरो निर्व्यापारः कियन्तमपि कालं स्थित्वा यदा पुनरपि चिकीर्षति प्रयतते वा, तदा तस्य चिकीर्षाप्रयत्नयोरुत्पादने चिकीर्षान्तरं प्रयत्नान्तरं वा नास्त्येवेति। ततश्च मनसां तत्संयोगा-नाञ्च न सम्भवत्यधिष्ठानमित्यनधिष्ठितेभ्यो मनस्तत्संयोगेभ्यो न प्रयत्नचिकीर्षे उत्पद्येयाताम्। अभ्युपगतायाञ्चोत्पत्तौ कार्यत्वा-ऽचेतनोत्पादनत्वहेतू व्यभिचरतः। न च सवितृप्रकाशवदीश्वरस्य ज्ञानेच्छाप्रयत्नास्तत्तद्भावभेदोपधानात्तत्तद्विषया भवन्तीति वाच्यम्, अन्योन्याश्रयप्रसङ्गात्। तत्तद्भावभेदोपधाने तत्तद्विषयत्वम्, तत्तद्विषयत्वे च तत्तदुपधानत्वम्। किञ्च—उपधीयमाना-नधिष्ठाने तदुपधानस्य कार्यस्याप्यनुत्पत्तिः। कार्यस्याधिष्ठानादे-रनुत्पत्तेः। एवमनित्यत्वपक्षे, अनवस्थादयो दोषा ऊहनीयाः। तथा चैवं विचारासहसर्वज्ञकर्तृत्वरूपो विशेषः पक्षधर्मताबलान्न धर्मिणि शक्यसाध्यः स्वयमनुपपद्यमानस्यान्योपपादकत्वासम्भवात्।

न चासति विशेषे सामान्यस्यानुमानिकस्य का गतिरिति वाच्यम्; अनुपपद्यमानविशेषे सामान्यस्य पर्यवसानेऽपि प्रमाण-सिद्धमनुपपन्नमुपपादनीयमिति विप्रतिषिद्धमिति वाच्यम्; विप्रति-षिद्धा सिद्धेतदुपपत्तेः। अनुपपद्यमानस्यानुपपत्ति रुचितैव। न च प्रमाणपक्षेऽपि प्रमाणसिद्धिप्रतिघातापातात्। न सम्भवत्येव तादृशो

विशेषं यमास्थाय क्षित्यादौ बुद्धिमत्पूर्वकत्वसामान्यं व्यवतिष्ठत। न चैवं सर्वानुमानोच्छेदप्रसङ्गः सम्भवद्विशेषविषयत्वादितरानुमानानाम्। नहि पर्वते वह्निविशेषो न सम्भवति। अपि चोत्पत्तिमत्त्वमात्रमत्र हेतुः क्रियते तद्विशेषो वा (यदुक्तम्—अदृष्टकर्तृकाणामपि क्रियादर्शिनोऽपि कृतबुद्धिरुपजायते) त एवोत्पत्तिमन्तोऽचेतनोपादाना बुद्धिमत्पूर्वका ये बुद्धिमदन्वयव्यतिरेकानुविधायिभावाभावाः प्रमाणेनोपलब्धा प्रासादाट्टालगोपुरतोरणादयश्च तथा न तु तनुभुवनादयो नखलु तद्भावाभावयोर्बुद्धिमद्भावाभावानुविधानं कदाचिदप्युपलब्धम्। न च घटादेरुत्पत्तिमतस्तथोपलम्भेनानुत्पत्तिमतो गगनादेरनुपलम्भादुत्पत्तिमत्त्वस्य च तनुभुवनादेरप्यभेदात्तथात्वमिति वाच्यम्, उत्पत्तिमत्त्वाविशेषेऽपि वैलक्षण्यात्। नहि मृद्विकारस्य घटादेर्मनुष्यकार्यत्वमिति शक्रमूर्ध्नोऽपि तत्कार्यत्वम्। यदि मृद्विकारस्य तद्विधसंस्थानस्यापि घटस्य मनुष्यनिर्माणदर्शनात्तादृशत्वेऽपि तदन्वयव्यतिरेकानुविधानाभावान्न शक्रमूर्ध्नो मनुष्यकार्यत्वमिति, तर्हीहापि साम्यात्। यस्य यस्य प्रासादेर्बुद्धिमद्भावाभावानुविधानमस्ति तस्य तस्य तत्पूर्वकत्वाभ्युपगमेऽपि तद्विधस्यापि तनुभुवनादेस्तदन्वयव्यतिरेकानुविधानाभावान्न तथात्वम्।

नन्वेवं योऽसो धूमविशेषो वन्हिभावानुविधायी स स सर्वो वह्निपूर्वोऽस्तु नतु पर्वतनितम्बवर्ती तथेति कथं ततो वह्निरनुमीयते सामान्यविषयत्वे तु कार्यकारणभावावधारणस्येहापि साम्यमिति चेन्न, तथात्वे शक्र मूर्ध्नोऽपि मनुष्यकार्यत्वापत्तेः। यदि तु घटकुड्याद्यपेक्षया शक्रमूर्धादेर्वैशेष्यं शक्यसमर्थनं तदा प्रसादादिभ्यस्तनुभुवनादीनामपि विशेषः शक्यसमर्थन एव। वह्न्यन्वयव्यतिरेकानुविधायिनां धूमविशेषाणां पर्वतीयधूमात्र स्वरूपेण विशेषोऽतएव न पाण्डुद्रव्यमात्रात्कुमुद कपाला-

देरनुमानम्। धूमत्वसामान्यस्यैव तेभ्यो भेदापादकत्वात्। नच हेतुसमवधानं चेतनमन्तरेण सम्भवमदृष्टपरिपाकादेव कादाचित्कादेशकालभेदसमासादितजन्मनस्तदुपपत्तेस्तत एव कार्यनियमसिद्धेः। नहि नियतप्रकारसामर्थ्येभ्यः कारणेभ्यः कार्यमनियमेनोत्पत्तुमर्हति अन्यथा कर्तृचैतन्येप्ययं प्रसङ्गो दुर्वारः स्यात्तस्यापि कारणसामर्थ्यानुरोधेन नियोजकत्वात्। न च चेतनमन्तरेण कुम्भादि कारणानि न प्रवर्तन्त इति पृथिव्यादिकारणैरपि न प्रवर्तितव्यम्। यथा हि देहवत्प्रयत्नमन्तरेण कुम्भादिकारणेष्व प्रवर्तमानेष्वपि तनुभुवनादिकारणानि न देहवतः प्रयत्नमपेक्षन्ते तथैव चेतनमात्रप्रयत्नमपि नापेक्षिष्यन्ते किन्तु अदृष्टपरिपाकवत्क्षेत्रज्ञसंयोगादेव प्रवर्त्स्यन्तीति किं तद्भिन्नेन कल्पितेन ? तस्माद्विशिष्टमुत्पत्तिमत्त्वमसिद्धम्। पृथिव्यादिषूत्पत्तिमत्त्वमात्र प्रयोजकं विशेषप्रयुक्तव्याप्युपजीवित्वेन स्वाभाविकप्रतिबन्धवैकल्यात् स्वाभाविकप्रतिबन्ध (सम्बन्धवतश्च) वतश्च हेतोरनुमानाङ्गत्वात्। अन्यथोपाध्यायदर्शनादेरपि शिष्याद्यनुमापकत्वप्रसङ्गात्।

अपि च प्रेक्षावतां प्रवृत्तिः प्रयोजनवत्तया व्याप्ता, नेश्वरस्य प्रेक्षावतो जगन्निर्माणे प्रयोजमुपलभ्यते। प्राप्ताखिलप्रापणीयस्य प्राप्तव्याभावाम्। अत एव क्रीडासाध्यस्यापि सुखस्यावाप्तत्वात् क्रीडार्थमपि न तत्प्रवृत्तिः सम्भवति। नापि कारुण्येन परार्थं प्रवर्तते। सुखमयजीवलोकसृष्टेरेव प्रसङ्गात्। दुःखमयी सृष्टिस्तु बाहुल्येनोपलभ्यते। यदि च धर्माधर्मसहायस्य सृष्टिवैचित्र्यमुपपद्यत इत्युच्यते तदापि न सङ्गतिः। जगद्दुःख हेतोरधर्मस्य कारुणिकाधिष्ठानानुपपत्तेरनधिष्ठितस्य कार्यकरणे हेतोर्व्यभिचारः। न च वैराग्यजननहेतुतया परमार्थोपयोगितया दुःखानुभवस्य परहितकाम्ययैवाधर्ममधितिष्ठतीति वाच्यम्; दुखोत्पादस्येश्वराधीनत्वात्, तस्य तत्र वैमुख्येन तदनुत्पादे तदत्यन्तविमोक्ष-

रूपस्यापवर्गस्यायत्नसिद्धत्वात्। न च निष्प्रयोजनमपि स्वभावादेव जगत्सृजतीति प्रेक्षावत्त्वव्याघातात्तथा च तत्प्रणीतेष्वागमेष्वप्यनाश्वासः। कथञ्चिज्जगदुत्पत्तेश्चैतन्यमात्रपूर्वकत्वेऽपि नैकत्वम्, सेतुप्रासादादिष्वेकबुद्धिमत्पूर्वकत्वासिद्धेः। ईश्वरकर्तृकत्वेन सर्वस्यैककर्तृकत्वमितिचेन्न। सन्निवेशविशेषलक्षणस्य कार्यस्य चेतनमात्रनान्तरीयकतया तदसिद्धेः। दृष्टान्ते घटादावेकः कर्ता कुलालादिः साध्येत क्षित्यादावीश्वर इति व्यभिचारान्नोत्पत्तिमत्त्वमचेतनोपादानत्वं वा क्षित्यादीनाञ्चेतनात्मकं कर्तारं साधयितुं शक्नोति। दृष्टान्तसाध्ययोरनेककर्तृकत्वस्य दर्शनात्। यदि तु सर्वमेवेश्वरकर्तृकत्वेन साध्येत, ततो घटादीनामपि तथात्वापत्तौ पक्षकुक्षिनिक्षेपात् दृष्टान्ताभाव एव स्यात्। न च व्यतिरेकी हेतुः सम्भवति, कादाचित्कादृष्टपरिपाकादेव देशकालादिप्रतिनियत कार्योत्पादोपपत्त्या तद्व्यतिरेकाव्यभिचारस्य निश्चितत्वात्। यदि च घटादेर्द्विकर्तृकत्वं ततः क्षित्यङ्कुरादीनामपि द्विकर्तृकत्वापत्त्येश्वरेश्वरप्रसङ्गादनवस्था। यथा प्रत्यक्षसिद्धकुलालादिकर्तृकेऽपि घटादौ तावतैवोपपद्यमानोत्पादे चेतनान्तरमीश्वरस्तत्कर्तारं कुलामधिष्ठातुं कल्प्यते तथैवेश्वरमधिष्ठातुमीश्वरान्तरमित्यनवस्था। न चानवस्थाप्रसङ्गादेव न द्वितीयस्येश्वरस्यानुमानमिति वाच्यम्; एकानुमानेऽप्यनवस्थायास्तुल्यत्वात् लब्धपारिपाकादृष्टवत् क्षेत्रज्ञसंयोगादेव क्षित्यादिकार्योत्पत्तावीश्वरकल्पनाया अनवकाशात्। अथ न द्व्यधिष्ठातृका घटादयः सर्वमेकाधिष्ठातृकमिति नेश्वरान्तरानुमानञ्च न वानवस्थेति चेन् सर्वज्ञत्वासिद्धेः।

यदपि च यत्परस्परोपकार्योपकारकभावेन व्यवस्थितं तदेककर्तृकं दृष्टम् यथा रथावयवा एकतक्षपूर्वका दृष्टास्तथा क्षित्यङ्कुरादिकमपि परस्परोपकार्योपकारकभावेन व्यवस्थितमिति तेनाप्येककर्तृकेन भाव्यमिति जगत्कर्तुः सार्वज्ञसिद्धिरिति। तदप्य-

किञ्चित्करम्, रथादीनां नानातक्षपूर्वकत्वस्यापि दर्शनात्। अपि चेश्वरस्य क्लेशकर्मविपाकाशयापरामर्शाभ्युपगमात् कर्माभावे देहाद्यनुपपत्तिस्तदभावे बुद्धिरैश्वर्यं वा नोपपद्यते। कुतः सार्वज्ञम् वह्न्यभावे धूमस्येव कर्माशयाभावे शरीरादीनामनुपपत्तेः। यस्य मते सर्वज्ञेऽपि कर्माशयसत्त्वं तन्मते सर्वज्ञत्वस्य कर्माशयपूर्वकत्वेन कर्मज्ञानमन्यतोऽभ्युपेतव्यं येन कर्माशयेनास्य शरीरादयो जनयितव्यास्तेनापि ज्ञातेनाधिष्ठितेन च भाव्यम्, तथाचानवस्था। तत्रापि चैष एव प्रसङ्गः।

ननु हेत्वभावे कार्याभाव इति नियमेन यदि तनुभुवनादीनां हेतुपूर्वकत्वं सिद्ध्यति तदा सर्वज्ञत्वसिद्धिस्तत्सिद्धौ दूषणमपि न सिद्ध्यति। तथा च "यत्रोभयोः समो दोषः परिहारश्च तादृशः। नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे" इतिरीत्या नैकोऽनुयोगमर्हतीति चेन्न वैलक्षण्यात्। अयमभिप्रायः—प्रत्यक्षं दर्शननिरपेक्षमुपजायमानमदृष्टचरमपि त्रैलोक्यविलक्षणमपि स्वलक्षणमर्थं गोचरयितुं शक्नोत्येवानुमानं व्याप्त्यपेक्षितया व्याप्तेश्च पूर्वदर्शनाधीनतया दृष्टसलक्षणमेव गोचरयति न विलक्षणमदृष्टलिङ्गसम्बन्धात्। तथा च तनुभुवनादिहेतुत्वेनानुमीयमाना बुद्धिर्यथादर्शनमेवानुमीयेत। सा चानित्या शरीरात्ममनःसंयोगहेतुरसर्वविषयास्मदाद्यनुपलब्धेति तद्विधैवानुमातव्या। एवञ्च नित्यत्वसर्वविषयत्वादि व्याहन्यन्येत। नच वह्न्याद्यनुमानस्यास्त्येव प्रसङ्गः पर्वतेऽनुमीयमानस्य वह्नेर्महानसादिदृष्टवह्निविलक्षणत्वाभावात्। न च देशभेदस्तद्वैलक्षण्याय पर्याप्तोऽन्यत्वात्। न च तर्हि कथं रूपाद्युपलब्धेरिन्द्रियानुमानं तत्र दण्डादिकरणसालक्षण्याभावादिति वाच्यम्, रूपादिपरिच्छित्तिकरणानामिन्द्रियाणामनुमानागोचरत्वात्। न च तर्हि कथमिन्द्रियसिद्धिः रूपादि परिच्छित्त्यन्यथानुपपत्त्यार्थापत्त्या तत्सिद्धेः। सा च सम्बन्धदर्श-

न्नानपेक्षतया न दृष्टसालक्षण्यमपेक्षते। न चैवं बुद्धिमत्पूर्वकत्वेऽपि अर्थापत्तेरन्यथानुपपद्यमानस्य कस्यचिदप्यदर्शनादिति वाच्यम्, अदृष्टवत्क्षेत्रज्ञपरमाणुसंयोगात् तनुभुवनादेरुत्पत्तरुपपत्तेरप्यस्ति साधकापेक्षया साधनदूषणस्य वैलक्षण्यम्। अपि च साम्येपि वैतण्डिको यः स्वपक्षस्थापनाहीनः परपक्षं खण्डयति, स न निराकर्तुं शक्यते। तुल्यत्वेऽपि प्रतिबन्धमात्राद् दूषणसाधनमपि सत्प्रतिपक्षमपि, साधनन्तु निरस्तप्रतिपक्षं साध्यसिद्धा उपयुज्यते, न तु सत्प्रतिपक्षं प्रतिबन्धमात्रात्। न च बुद्धिमात्रं सन्निवेशविशेषहेतुः, अपि तु प्रेक्षारूपबुद्धिविशेष एव तद्धेतुः। प्रेक्षा च विन्यासप्रयोजनविचारनिर्णयरूपा। न च सा तत्र सम्भवति, स्वार्थपदार्थाभावात्। ननु माभूत्सर्वज्ञो नियोक्ता धर्मज्ञस्त्विष्यताम्। तदुक्तम्—

'हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः।
यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः॥
कीटसंख्यापरिज्ञानं तस्य नः कोपयुज्यते।
दूरं पश्यतु वा मा वा तत्त्वमिष्टन्तु पश्यति॥
प्रमाणं दूरदर्शी चेद्वयं गृध्रानुपास्महे॥"

ननु धर्मो रूपविशेषाभावात् कथं प्रत्ययपूर्व इति चेन्न। रूपवत एव चक्षुरादीनां विषयत्वनियमे प्रमाणाभावात्। न च प्रत्यक्षस्य वर्तमानकालमात्रविषयत्वेन कथं प्रत्यक्षविषयत्वमिति वाच्यम्; धर्मस्य कदाचिद्वर्तमानत्वेऽतिशयवच्चक्षुरादिविषयत्वे बाधाभावात्। आत्यन्तिके चावर्तमानत्वे खपुष्पवदसत्त्वापत्तेः। यत्तु कुर्विति नियोगो धर्मो नियोगविषयस्य यागादेरेव धर्मत्वोपगमात्, तत्रैव धर्मप्रसिद्धेस्तस्य चोत्पाद्यत्वेन प्रत्यक्षत्वादिति। तन्न; तदानीमप्रत्यक्षत्वे व्युत्पन्नस्य प्रत्यक्षत्वसमवायात्। न चोत्पन्नमपि यागादि-

नै स्वरूपेण धर्मः, श्रेयःसाधनरूपेणैव तत्त्वात्, तच्चातीन्द्रियमिति वाच्यम्; विकल्पासहत्वात्। तथा हि—यदि श्रेयःसाधनता शक्तिश्चेत्पूर्वोक्तयुक्तेन्द्रियाणां परिमाणतो विषयनियमस्तु न निरूप्यते। यदि तु श्रयः साधनस्य सम्बन्धः श्रेयःसाधनत्वम्, कृत्तद्धितसमासेषु सम्बन्धाभिधानं त्वतल्भ्यामिति वार्तिकात्। स च सम्बन्धिद्वयाधीननिरूपणो नान्यतरेण सम्बन्धिना निरूप्यते। तथा च कालान्तरभाविन्यसति स्वर्गादिश्रेयसि यागादिसम्बन्धः कथं प्रत्यक्षं भवितुं शक्यत इत्युच्येत; तदापि यागादीनां श्रेयः साधनत्वाभावे धर्मत्वहान्या यागादिसमवेतातिशयद्वारा श्रेयःसाधनत्वं वर्तमानमेवेति कुतो नाक्षविषयः? न चानुष्ठानात्प्राक्धर्माधर्मज्ञानमिष्यते, तज्ज्ञानस्यानुष्ठानाङ्गत्वात्, तथा च कथं भविष्यतोऽक्षविषयत्वमिति वाच्यम्; अनुष्ठातॄणां प्रत्यक्षाविषयत्वेऽप्युपदेष्टुरतिशयवतस्तदुपपत्तेः। स चातिशयो व्योम्नो महत्त्ववत्स्वाभाविक उपदेशान्तरजः क्रियानिबन्धनो वा, योगादिप्रभावस्यापलापानर्हत्वात्।

तदेतदपि मीमांसका न क्षमन्ते। तथा हि—प्रलीयमानकर्मोपजनस्य पूर्वापराङ्गोपपादितावस्थान्तरस्य देशकालाद्यासादितपरिणतिभेदस्यातिशयस्य कर्मणोऽतिवर्तमानस्य कर्तृस्थस्य चिरभाविफलसाधनत्वमुच्यते वृद्धैः। तस्य च स्वकाले वर्तमानत्वेऽपि कर्मकालेऽवर्तमानत्वेन कथं कर्मसम्बन्धितया तत्प्रत्यक्षत्वसम्भवः? न चैवमतिशयस्य क्षेत्रज्ञसमवायित्वेन कर्मणः कथं साधनत्वमिति वाच्यम्; तदाहितत्वेन तदुपपत्तेः। नहि स्वसमवाय्येव साधनंभवतीति कश्चिन्नियमः। कार्यानुमेयं तद्यत्र कार्यायालम्, तत्रैव युक्तम्, तदाहितत्वात्तस्य। अयमभिप्रायः—यदि हि तद्रूपमन्यनिरपेक्षं गम्यते, ततो यत्प्रत्यासन्नं गम्यते तस्य स्यात्, यथा घटस्य शौक्ल्यं न त्वेतन्तथा। अपितु कर्माणि कारणत्वेन फलाय चोदितानि

तदुपपत्त्यैतत्कल्प्यमानं कर्मसम्बद्धमेवावगतम्; न चान्यसम्बद्धम् एतत्फलसम्बद्धमुपपादयति कर्मणः। तथा प्रतीयमानमपि चैत्कर्मापहायान्येन सम्बद्ध्येत स्वरूपादेव हीयेतेति कर्मण्येवेतत्। न चौपचारिकः कर्मणः साधनभावः काष्ठैः पचतीत्यादौ काष्ठादिषु तथैव सिद्धेः। न खलु काष्ठादीनामपि साक्षात्पक्तिसाधनता किन्त्वौष्ण्यापेक्षस्य वह्निसंयोगप्रचयभेदस्यैव। अथ च काष्ठैः पचतीत्युच्यते काष्ठानां साधनता, अग्नितण्डुलसमवाय्यपि वह्निसंयोगस्तत्पूर्वस्तथा यागादीनामपि।

पातञ्जलास्तु आप्तेन दृष्टोऽनुमितो वार्थः परस्य स्वबोधसंक्रान्तये शब्देनोपदिश्यते। शब्दात्तदर्थविषया वृत्तिश्रोतुरागमः, अत्रैव तत्त्ववैशारद्यां तत्त्वदर्शनकारुण्यकरणपाटवादिसम्बन्ध आप्तिस्तया वर्तत एव इति आप्तस्तेन दृष्टोऽनुमितो वार्थः श्रुतस्य पृथगनुपादानम्। तस्य दृष्टानुमितमूलत्वेन ताभ्यामेव चरितार्थत्वात्। आप्तचित्तवर्त्तिज्ञानसदृशस्य श्रोतृचित्ते समुत्पादः, स्वबोधसंक्रान्तिस्तस्या अर्थं उपदिश्यते। श्रोतृहिताहितप्राप्तिपरिहारोपायतया प्रज्ञाप्यते। चैत्यं वन्देत स्वर्गकाम इत्यादयो बौद्धाद्यागमास्तु न दृष्टानुमितार्थविषयाः। कस्यापि जीवस्य नालौकिकसाध्यसाधनभावः शक्यज्ञानः। न चैवं मन्वाद्यागमोपि तथाभूत एवेति वाच्यम्। तस्य वेदमूलकत्वेन तथात्वायोगात्। वेदवक्ता त्वीश्वरो दृष्टानुमितार्थ एव। स चेश्वरोऽविद्यादिक्लेशैः कुशलाकुशलादिभिः कर्मभिस्तत्फलैर्विपाकैस्तदनुगुणाभिर्वासनाभिरपरामृष्टः पुरुषविशेषः। न चैवं कैवल्यप्राप्तपुरुष एव कश्चित् भविष्यतीति वाच्यम्। विशेषापपत्तेः केवलिनां पूर्वा बन्धकोटिः प्रकृतिलीनानामुत्तर बन्ध कोटिः सभाव्यते नैवमीश्वरस्य तस्य नित्यमुक्तत्वात्। प्रकृष्टसत्त्वोपादानाच्छास्त्रनिमित्तकः शाश्वतिक उत्कर्षः। शास्त्रमपि प्रकृष्टसत्त्वनिमित्तम्। ईश्वरसत्त्वेऽनयोः शास्त्रोत्कर्षयोरनादि-

सम्बन्धः। अत्र वाचस्पतिमिश्राः-तापत्रयपरीतान् प्रेत्यभावमहार्णवाज्जन्तूनुद्धरिष्यामि ज्ञानधर्मोपदेशेन। न च ज्ञानक्रियाशक्त्यतिशयसम्पत्तिमन्तरेण तदुपदेशः। न चैवमपहतरजस्तमोमलविशुद्धसत्त्वोपादानं विना इत्यालोच्य सत्त्वोत्प्रकर्षमुपादत्ते। अविद्यादिभिरपरामृष्टोऽप्याहार्यरूपेण शैलूष इव तत्तदभिमानोऽपि न भवति भ्रान्तः। नचैवमुद्दिधीर्षया भगवता सत्त्वमुपादेयम्। तदुपादाने च तदुद्दिधीर्षा चेदन्योन्याश्रय इति वाच्यम्। सृष्टिप्रलयप्रवाहस्यानादित्वेन तदनुपपत्तेः।

नचेश्वरस्य सत्त्वप्रकर्षे कस्यचित्प्रत्यक्षमनुमानं वास्ति न चेश्वरप्रत्यक्षप्रभवं शास्त्रमिति युक्तम्। कल्पयित्वापि स्वात्मैश्वर्यप्रकाशनाय तथोक्तिसंभवेनानाश्वाससंभवादिति वाच्यम्, मन्त्रायुर्वेदादिष्वीश्वरप्रणीतेषु प्रवृत्तिसामर्थ्याव्यभिचारनिश्चयात् प्रामाण्यस्य सिद्धत्वेन तन्निर्मितस्य शास्त्रस्यानतिशङ्कनीयत्वात्। न चौषधिभेदानां तत्संयोगविशेषाणां च मन्त्राणां तत्तद्वर्णावापोद्धारेण सहस्रेणापि पुरुषायुषैर्लौकिकप्रमाणव्यवहारी शक्तः कर्तुमन्वयव्यतिरेकौ। न चागमादन्वयव्यतिरेकौ ताभ्यां चागमस्तयोरनादित्वादिति प्रतिपादयितुं युक्तम्। महाप्रलये तत्सत्त्वादनयोर्विच्छेदात्। न च प्रलयसत्त्वे प्रमाणाभावः। महदहङ्कारादिरूपपरिणामेन प्रधानेनापि कदाचित्सदृशपरिणामेनापि भाव्यम्। सदृशपरिणाम एव साम्यावस्था स च महाप्रलयः। तस्मान्मन्त्रायुर्वेदवद्वेदराशिरपि परमेश्वरनिर्मित प्रमाणभूत एव सृष्टिप्रलयौ चागमानुमानाभ्यां सिद्ध्यतः। सर्वज्ञपूर्वकत्वे सति सिद्धमाप्तोक्तत्वेन मन्त्रायुर्वेदप्रामाण्यवद्वेदप्रामाण्यम्।

परमेश्वरीयनित्यज्ञानमूलत्वेन प्रवाहरूपेण नित्यान्येव वेदवाक्यानि। यदि न नित्यानि कथं प्रमाणानि ? पुरुषनिर्मितत्वे तु पुरुषाणां चित्राभिसन्धित्वेन भ्रमशङ्का न शक्याऽपाकर्तुम्। तस्माद-

पौरुषेयत्वमेव पुरुषाश्रयान्दोषानपाकुर्वद्वेदेतत्प्रामाण्यव्यवस्थापकम्। तदेतत्पातञ्जलमतमपि मीमांसकैः प्रतिक्षिप्यते, परमेश्वरमूलकत्वेन शास्त्रप्रामाण्यं शास्त्रप्रामाण्येन चेश्वरसिद्धिरित्यन्योन्याश्रयान्न तदुभयसिद्धिः। न चानादित्वेन तच्छक्य समर्थनम्। वीजाङ्कुरादिवत्तस्य प्रमाणान्तरासिद्धत्वात्। न चानुमानेन तत्सिद्धिर्नैयायिकानुमाननिराकरणयुक्तिभिरेवान्यानुमानानामपि निराकृतत्वात्।

यदुच्यते सातिशयानां काष्ठाप्राप्तिः परिमाणानामुपलब्धा। यथा कुवलामलकविल्वेषु महत्त्वस्य सातिशयस्याकाशे काष्ठाप्राप्तिः। सातिशयञ्चेदं विज्ञानमुपलभ्यते तत्तदेकद्विबहुविषयादिव्याप्त्या तदिदमपि क्वचित्काष्ठाप्राप्तियुक्तं सर्वज्ञतैव काष्ठाप्राप्तिः। तदपि न विकल्पासहत्वात्तथाहि—यदि यतः परं नास्ति सा काष्ठा भवतु तत्प्राप्तिर्न तावता सार्वज्ञप्राप्तिः। भूयिष्ठविषयत्वेन तु न सार्वज्ञम्। पार्थिवस्य गोलकस्य पार्थिवान्तरापेक्षं बहुतराकाशावकाशव्यापित्वेपि न सर्वव्यापिता। अथ यतः परं न सम्भाव्यते सा काष्ठा कार्यद्रव्यैर्व्यभिचारात्। सातिशया अपि घटादयः परा संभावनीयातिशायिनः, अन्यानवकाशप्रसङ्गात्। एकेन सर्वव्याप्तेः। न च गुणत्वेतीति विशेषणान्न व्यभिचार इति वाच्यम्, तद्गतानां गरिमादीनां तदवस्थासम्भवात्।

ऐश्वर्यफलस्य धर्मस्य न सा काष्ठा तद्वदैश्वर्यजननाद्धर्मस्यापि ईश्वरैश्वर्यधर्मफलत्वाभावात्। क्लेशकर्मविपाकाशयापरामर्शादनेकैश्वर्यण्याघातात्।

ननु चेश्वरं विना कर्मणां फलदातृत्वञ्जगत्स्रष्टृत्वं वा नोपपद्यत इति तदर्थमीश्वरकल्पनमावश्यकमिति चेन्न मीमांसकैः कर्मभिरेव तत्साधितत्वात्।

तथाहि—उपदेशो विधिः, नाज्ञादिः, उपदेशश्च नियोज्यप्रयोजने कर्मणि लोकशास्त्रयोः प्रसिद्धः। यथाऽऽरोग्यकामो जीर्णे

भुञ्जीत, एष सुपन्था गच्छत्वनेन भवान्, आज्ञादिस्तु नियोक्तृ-प्रयोजनस्तत्राभिप्रायस्य प्रवर्तकत्वात्, अपौरुषेये वेदे च तदसम्भ-वात्। तदेवमुपदेशस्य नियोज्यानुष्ठात्रपेक्षितप्रयोजनानुकूलव्या-पारगोचरत्वमेव। तथा च—"स्वर्गकामो यजेत" इत्यादौ यागा-दयो नियोज्यापेक्षितस्वर्गादिसाधनतया गम्यन्ते।

"स्वर्गकामो यजेत" इत्यादिश्रुतिभिः कर्मफलसम्बन्धः श्रूयते, न च किमप्यपूर्वमनुत्पाद्य कर्म विनश्यत् कालान्तरितं फलं दातुं शक्नोतीति तदन्यथानुपपत्या कर्मणः काचिदुत्तरावस्था फलस्य पूर्वावस्था वा कल्पनीया। तथा च कर्मणो यत्फलं प्रति साधनत्वं श्रुतिषु श्रुतं तदुपपादनाय कर्मणोऽवान्तरव्यापाररूपमपूर्वमभ्यु-पेयते। न च व्यापारवतः कर्मणोऽनुक्षणविनाशिनोऽसत्त्वे कुतो व्यापारावस्थितिरिति वाच्यम्, व्यापारवति सत्येव व्यापारो नास्तीति नियमाभावात्।

अतएवाग्नेयादिषु प्रध्वंसिष्वसत्स्वपि तदुत्पत्त्यपूर्वाणां परमा-पूर्वे जनयितव्ये तदवान्तरव्यापारत्वाभ्युपगमः। असत्यपि घृत-पानादिकर्मणि तेन पुष्टौ कर्तव्यायां तत्परिणामभेदानां तदवान्तर-व्यापारत्वाभ्युपगमश्च।

तदेतज्जैमिनिमतं "धर्मं जैमिनिरत एव" इति सूत्रेणोत्तरमी-मांसायामुपस्थाप्य "पूर्वं तु बादरायणो हेतुव्यपदेशात्"। "फलमत उपपत्तेः" इति सूत्राभ्यां जैमिनिगुरोर्भगवतो बादराय-णस्य मतेनेश्वरादेव कर्मफलसिद्धिः साधिता। तदेव चोप-पादितं भगवत्पादैः। तथा च न केवलात् कर्मणोऽपूर्वाद्वा फलमुपपद्यते। किन्तु कर्मापेक्षादपूर्वापेक्षाद्वा परमेश्वरादेव फल-मुपपद्यते। तथाहि—"एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते। एष उ ह्येवासाधुकर्म कारयति तं यमधोनि-

नीषते ।" इत्यादिशास्त्रेभ्यः। सर्ववेदान्तेषु चेश्वरहेतुकाः सृष्टयो व्यपदिश्यन्ते। तदेव चेश्वरस्य फलहेतुत्वं यत्स्वकर्मानुरूपाः प्रजाः सृजति।

अत्रैव वाचस्पतिमिश्रा भामत्यां प्राहुः दृष्टानुसारिणी कल्पना नान्यथा न जातु मृत्पिण्डदण्डादयः कुम्भकाराद्यनधिष्ठिताः कुम्भाद्यारम्भाय विभवन्तो दृष्टाः।

न च विद्युत्पवनादिभिरप्रयत्नपूर्वकैः कार्यं सिद्ध्यत्येवेति व्यभिचार इति वाच्यम्, तेषामपि पक्षनिक्षिप्तत्वाद् व्यभिचारानुपपत्तेः। तथाचाचेतनं कर्म वा अपूर्वमन्यद् वा चेतनानधिष्ठितं स्वतन्त्रं स्वकार्ये प्रवर्तितुं नोत्सहते, न च क्षेत्रज्ञस्याधिष्ठानं सम्भति, कर्मस्वरूपसामान्यविनियोगादिविशेषविज्ञानशून्यस्य तस्य तदनुपपत्तेः।

अतएव न सिद्धसाधनम्, तस्मात् तत्तत्प्रासादाट्टालक-गोपुर-तोरणाद्युवजननिदर्शनसहस्रैश्चेतनाधिष्ठितानामेवाचेतनानां कार्यारम्भकत्वमिति निश्चीयते। देवताधिकरणे देवतायाश्चैतन्यमपि साधितम्, असति बाधके श्रुतिस्मृतितिहासपुराणप्रसिद्धं तन्न प्रतिषेद्धुं शक्यते। द्वारिभूतमहावाक्यार्थाविरोधे द्वारभूतस्यावान्तरवाक्यार्थस्य प्रामाणिकत्वे बाधाभावात्। "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः, ईशानः सर्वविधानामीश्वरः सर्वभूतानामित्यादिश्रुतिभिरीश्वरश्च प्रामाणिक एव।

न चोपासनाविधिशेषत्वेनान्यपरत्वान्न' ता ईश्वरसाधनायालमिति वाच्यमन्यपराणामपि द्वारभूतार्थबोधने बाधाभावस्योक्तत्वात्। न चाम्नायस्य क्रियार्थत्वेनानर्थक्यमतदर्थानामिति न्यायेन क्रियापरत्वमेव सर्ववेदानाम्, तन्न्यायस्य कर्मबोधकवेदभागपरत्वात्, सर्ववेदानां ब्रह्मण्येव तात्पर्यावधारणाच्च। "सर्वे

वेदा" यत्पदमामनन्ति "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादिश्रुतिस्मृतिभ्यः। न च क्रियापरत्वेनैव, वेदानां प्रामाण्यम् अप्रवोजकत्वात्।

फलवन्निश्चितार्थावबोधकत्वेन प्रामाण्ये कर्मबोधकवाक्यानामिव सिद्धब्रह्मबोधकश्रुतीनामपि प्रामाण्यम्। ज्वरितः सन् पथ्यमश्नीयात्, न सर्पायाङ्गुलिं दद्यादित्यादिप्रवृत्तिनिवृत्तिबोधकवाक्यानामिव नायं सर्पो रज्जुरेषा इति सिद्धवस्तुबोधक वाक्यानामपि हितशासनपरत्वं भवत्येव।

तथा चानन्यपरैरपि ईशावास्यं, सपर्य्यगाच्छुक्रं, यतो वा इमानि भूतानि जायन्ते इत्यादिमन्त्रब्राह्मणवाक्यैः परमानन्दात्ममोक्षप्राप्तये परमेश्वरोऽवबोध्यते।

कर्मबोधकवाक्यानामपि परमेश्वराराधनविधायकत्वेन परमेश्वर एव महातात्पर्यम्। लौकिकश्चेश्वरो दान,-परिचरण,-प्रणामाञ्जलिकरण-स्तुतिमयीभिरतिश्रद्धागर्भाभिर्भक्तिभिराराधितः प्रसन्नः। स्वानुरूपमाराधकाय फलं प्रयच्छति। विरोधितश्चापक्रियाभिर्विरोधकायाहितमिति सुप्रसिद्धम्। तस्मादीश्वरचेतनानधिष्ठितमचेतनं कर्मापूर्वं वा फलं प्रयच्छतीति दृष्टविरुद्धम्।

यथा विनष्टं कर्म न फलं प्रसूत इति दृष्टविरोधादेवापूर्वं कल्प्यते, तथैव देवपूजात्मको यागो देवताप्रसादमन्तरा फलं प्रयच्छतीत्यपि दृष्टविरुद्धमेव। नहि राजपूजात्मकमाराधनं राजानमप्रसाद्य फलाय कल्पते तस्माद् दृष्टानुगुण्याय यागादिभिरपि देवता प्रसन्तिरुपकल्प्यते। तथा च स्थायिनो देवताप्रसादादेव फलोत्पत्तिरुपपद्यते, इति नार्थोऽपूर्वेण। एवमशुभेनापि कर्मणा देवताविरोधनमिति श्रुतिस्मृतिपुराणप्रसिद्धम्। तत एव स्थायिनोऽनिष्टफलप्रसवः।

न शुभाशुभकर्मानुरोधेन तदनुरूपं फलमापादयता देवतायां द्वेष-पक्षपात-वैषम्य-नैर्घृण्यादयो वक्तुं शक्यन्ते। साधुकारिणमनुगृह्णाति निगृह्णाति च पापकारिणं राजनि तथा दर्शनात्। तथैवालौकिकेऽपीश्वरे वैषम्यनैर्घृण्यादयः परिहर्तुं शक्यन्ते। न चेश्वरस्य सृष्टिपराङ्मुखत्वेन सर्वदुःखनिवृत्तिलक्षणस्यापवर्गस्य सिद्धिः संभवति, सृष्टिमन्तरा तत्त्वज्ञानसामग्र्यलाभेन तत्त्वज्ञानानुपपत्तेः अनाद्यविद्याकामकर्मवासनानां बाधानुपपत्त्या तदसम्भवात्।

यथा च परमापूर्वाणां कर्तव्ये उत्पत्त्यपूर्वाणामङ्गापूर्वाणां चोपयोगः, एवमेव प्रधानाराधनेऽङ्गाराधनानामुत्पत्त्याराधनानाञ्चोपयोगः। स्वाम्याराधन इव तदमात्यतत्प्रणयिजनानामाराधनानामिति सर्वं समानमन्यत्राभिनिवेशात्।

तस्माद् दृष्टाविराधनेनाराधिताया देवताया एव फलं नापूर्वान्न वा केवलात्कर्मणः।

मीमांसकमतरीत्या षड्भिः प्रमाणैस्तत्तत्प्रमेयान् यो जानाति स एव सर्वज्ञः, तथा च सर्वज्ञोऽपि वेदवाक्यैरेव धर्माधर्मादीन् जानाति तत्रापि संशयविपर्ययराहित्येन वेदवाक्यैरेव धर्मतत्त्वदर्शनमुच्यते। यथा रसनेन्द्रियग्राह्यस्य रसस्य न कस्यापि चक्षुर्ग्राह्यत्वम् तथैव वेदैकसमधिगमयस्य धर्मतत्त्वस्य न तदतिरिक्तवेद्यत्वम् इति न्यायसामान्यात्। "यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्। दूरसूक्ष्मादिदृष्टौ स्यात् न रूपे श्रोत्रवृत्तिता।" यद्यपि पूर्वोक्तेश्वरातिरिक्तस्य कस्यचित्सर्वज्ञत्वं तथाविधमेव; ईश्वरस्य तु जगत्कारणत्वेन सर्वज्ञत्वं स्वसंसृष्टसर्वावभासकत्वेनैव। न चेश्वरासिद्धिः, "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व" इत्यादिश्रुतिभिः

जगदुत्पत्तिस्थितिलयलीलस्य ब्रह्मणः सिद्धत्वात् । तस्यैव चेश्वरत्वात् । नचासां श्रुतीनामप्रामाण्यम्, अतत्परत्वं वा वक्तुं शक्यम्, अप्रामाण्ये, अतत्परत्वे च कारणाभावात् । न च कार्यपरत्वेन प्रामाण्यनियमः, अप्रयोजकत्वात् । फलवन्निश्चितार्थाव-बोधकत्वेनैव वेदानां प्रामाण्याभ्युपगमात् । विधिभागवत् वेदान्तानामपि तुल्यः सम्प्रदायाविच्छेदः, अस्मर्यमाणकर्तृकत्वञ्चे-त्यपौरुषयत्वेन स्वत एव प्रामाण्यम् ।

भूतभौतिकानि स्वोपादान गोचरापरोक्षज्ञानचिकीर्षाकृति-मज्जन्यानि, कार्यत्वे सति विलक्षणत्वात्, शय्याप्रासादादिवत् इत्यादिभिरनुमानैश्च जगत्प्रकृतेः परमेशितुः सार्वज्ञ्यावगमः सुगमः । यदा लौकिकोऽपि कर्त्ता जानाति, इच्छति अथ करोति तदा किमुत अनन्तकोटिब्रह्माण्डततेरचयिता ।

केचित्तु चिकीर्षाकृतिकर्तृत्वनिर्वाहाय चिकीर्षाकृत्यन्तरापेक्षा-यामनवस्थापत्त्याः कार्यानुकूलज्ञानवत्त्वमेव ब्रह्मणः कर्तृत्वं प्राहुः । न च ज्ञानस्यापि कार्यत्वेन तत्रापि ज्ञानान्तरापेक्षायां तदवस्थैवा-नवस्थेति वाच्यम्, ज्ञानस्य ब्रह्मणः स्वरूपत्वेनाकार्यत्वात् । तथाच निखिलप्रपञ्चरचयितृत्वेन आर्थिकामीश्वरस्य सार्वज्ञ्यम् । हेतुसम-वधायकत्वेनापीश्वरसिद्धिः सम्भवत्येव । न च कादाचित्कपरि-पाकाद्दृष्टात्तदुत्पत्तिस्तस्याचेतनस्य तत्समवधायकत्वानुपपत्तेः । यत्तूक्तं सर्वज्ञपूर्वकत्वं भूतभौतिकस्य न सिद्ध्यति तेन हेतोर्व्याप्त्य-सिद्धेर्दृष्टान्तस्य च साध्यवैकल्पाच्छय्याप्रासादादौ कार्यत्वस्या-सर्वज्ञपूर्वकत्वेनैव व्याप्त्युपलब्धेश्च । न च ज्ञानवत्पूर्वकत्वमात्रं साधनविषयस्तद्विशेषस्य च सर्वज्ञपूर्वकत्वादिति तत्सिरिति वाच्यम् । साधनाव्याप्तस्य विशेषस्य तदसिद्धेरिति, तत्तुच्छम्, सामान्यमात्रव्याप्तावप्यन्तर्भावितविशेषस्यैव सामान्यस्य पक्षधर्म-तावशेन सिद्धेर्निष्प्रत्यूहत्वात् । अत एव क्रियात्वसामान्यस्य

करणमात्राधीनव्याप्तत्वेऽपि पक्षधर्मतावशच्चेन्द्रियकरणविशेष-सिद्धिर्भवति'। अत एव न दृष्टसालक्षणस्यैव साध्यस्यसिद्धिरुक्ते-न्द्रियानुमाने दृष्टविलक्षणसाध्यसिद्धेरिष्टत्वात्। यत्तु रूपादिपरि-च्छित्त्यन्यथानुपपत्त्यातत्सिद्धिरिति। तदप्यकिञ्चित्करम्। सर्वज्ञत्वासिद्धावपि तथैव वक्तुं शक्यत्वात्। यद्यप्युक्तमदृष्ट-वत्क्षेत्रज्ञपरमाणुसंयोगाद्भूतभौतिकाद्युत्पत्त्युपपत्त्या न तदनुपपत्त्या सर्वज्ञसिद्धिरिति तदतीव मन्दम्, चेतनानधिष्ठितस्यापूर्वस्य तदुप-पपादकत्वासम्भवात्। न च क्षेत्रज्ञाधिष्ठानेन तदुपपत्तिस्तस्याल्पज्ञ-स्याधिष्ठातृत्वानुपपत्तेः। यच्चोक्तं परमेश्वरस्य प्राप्ताखिलप्रापणीयस्य प्राप्तव्याभावादत एव क्रीडासाध्यस्यापि सुखस्यावाप्तत्वान्न क्रीडार्थ-मपि तत्प्रवृत्तिर्नापि कारुण्येन परार्थं प्रवृत्तिः सुखमयस्यैव लोकस्य सृष्टिप्रसङ्गादित्यादि, तदप्यसङ्गतम्। धर्माधर्मसापेक्षस्य परमेश्वरस्य विचित्रप्रपञ्चनिर्माणे वाधानुपपत्तेः। न च दुःखहेतोरधर्मस्य कारु-ण्येनाधिष्ठानं नोपपद्यत इति वाच्यम्, तस्यापि पापक्षयवैराग्यादि-जननाद्युपायतया कारुण्येन तदधिष्ठानोपपत्तेः। न च दुःखोत्पाद-स्येश्वराधीनत्वेन तस्य तत्र वैमुख्येन तदनुत्पादे तदत्यन्तविमोक्ष-रूपस्यापवर्गस्यानायासेन सिद्धत्वात्कृतं कारुण्येन पारार्थ्यप्रवृत्त्येपि वाच्यम्, सृष्टिमन्तरा तदनुपपत्तेः। तथाहि—"ऋते ज्ञानान्न मुक्तिः" "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यदि श्रुतिभिस्तत्त्वसाक्षात्कारमन्तराऽनाद्यविद्याकामकर्मलक्षण-बन्धनिवृत्तिपूर्वकपरमानन्दावाप्तिलक्षणो मोक्षो न सिद्धत्येव। तत्त्व-साक्षात्कारश्च वेदान्तश्रवणादिसाधनमन्तरा नोपपद्यते, श्रवणादिकञ्च देहेन्द्रियादि सृष्टिमन्तरा नोपपद्यत इति—कुतः सृष्टिमन्तरा तद्वै-मुख्यमात्रेण मोक्षसिद्धिः? यत्तूक्तं नासर्वज्ञः सर्वज्ञं ज्ञातुं शक्नोति, तज्ज्ञानाय सर्वज्ञान्तराभ्युगमेऽनवस्थाप्रसङ्ग इति तदपि धूलिप्रक्षेप-मात्रम्, पूर्वोक्तैरनुमानैः श्रुति-स्मृतीतिहास-पुराणादिभिः परमेश्वरस्य

सार्वज्ञ्यमस्मदादिभिरपि ज्ञातुं शक्यत्वात्। अपि चैवमेव शास्त्रज्ञ ज्ञानेऽपि विकल्पः सम्भवति शास्त्रज्ञं ज्ञात्वा शास्त्राध्ययनाय छात्राः प्रवर्तन्ते तत्रापि नाशास्त्रज्ञः शास्त्रज्ञं ज्ञातुं शक्नोति तज्ज्ञानमन्तरा कथमध्ययनाय प्रवर्त्स्यन्ते ? शास्त्रज्ञश्चेन्नतरां प्रवर्तिष्यते ?

वस्तुतस्तु पूर्वमीमांसकानामपि नेश्वरस्य तत्सर्वज्ञतायाश्च खण्डने तात्पर्यम्। किन्तु तत्रानुमानस्वातन्त्र्यखण्डन एव। उत्तरमीमांसकैस्तु "तन्त्वौपनिषदं पुरुषं पृच्छामि" नावेदविन्मनुते तं बृहन्तम्" "शास्त्रयोनित्वात्" इत्यादिश्रुतिसूत्रादिभिर्धर्मस्येव ब्राह्मणोऽपि वेदैकसमधिगम्यत्वमुपेयते। वेदार्थस्योपपत्तये बुद्ध्या-रोहाय च "मन्तव्य" इति श्रुत्यनुरोधेनैव श्रुत्यविरुद्धानुमानानि युक्तिरूपेणोपादीयन्ते "मन्तव्यश्चोपपत्तिभिरित्याप्तोक्तेः।

नैयायिकादिभिस्त्वीशरोक्तत्वेन वेदस्य प्रामाण्यमुपेयते, तस्य च वेदोक्तत्वेन सिद्धावन्योन्याश्रयापत्त्या तत्र स्वातन्त्र्येणानुमान-प्रामाण्यमुच्यते। तत्रानुमानेनेश्वरसामान्यसिद्धावपि न तस्य वेदकारत्वं साधयितुं शक्यते। तथात्वेऽन्यैरपि वेदविरोधिभिर्बौद्ध-जैनखृष्टीयमौहम्मदमतानुयायिभिः स्वस्वसम्प्रदायानुगतग्रन्थ-कारस्यापि परमेश्वरत्वसर्वज्ञत्वादिकञ्च साधयितुं शक्यत एवेति तैरविशेषापत्तिरव वेदस्य भविष्यति। तथात्वे सापेक्षत्वेनैव वेदस्य प्रामाण्ये प्रामाण्यस्वतस्त्वं भज्येत

वैदिकैस्तु चतुर्मुखस्य ब्रह्मणो निर्मात्रापीश्वरेण वेदा न निर्मीयन्ते किन्तु प्रवाहरूपेण नित्यसिद्धा एव वेदा ब्रह्मणो हृदि प्रकाश्यन्ते। "यो वै ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इत्यादिश्रुतेः।

वेदान्तमतरीत्या वेदानां ब्रह्मोपादानकत्वेऽपि तत्र ब्रह्मणः स्वातन्त्र्याभावेनापौरुषेयत्वमेव। तावतैवापास्तसमस्तपुंदोपशङ्का-

कलङ्कत्वेन धर्मे इव ब्रह्मण्यपि स्वत एव प्रामाण्यम् । नैवात्र मीमांसकानां विरोधलेशोऽपि । न च सृष्टिप्रलयाऽङ्गीकारेण सम्प्रदायविच्छेद इति वाच्यम्, परमेश्वरे सम्प्रदायाविच्छेदस्य वर्तमानत्वात् । न च बहुषु सम्प्रदायाविच्छेदे यथाश्वासो न तथैकस्मिन्नीश्वर इति वाच्यम्, बहूनामप्यपेक्षयाऽऽप्ततम एकस्मिन्नपि तत् सम्भवात् । बहुष्वनाप्तेषु तदसम्भवाच्च । अपि च सुप्तप्रतिबुद्धन्यायेन हिरण्यगर्भादिषु बहुषु प्रजापत्यादिषु विशिष्टतपःसमासादितसिद्धिषु सम्प्रदायपारम्पर्याविच्छेदः सृष्टिप्रलयाङ्गीकारेऽपि शक्यसमर्थन एवेति न काचिदनुपपत्तिः । ननु वेदस्य ब्रह्मोपादानकत्वे कथमपौरुषेयमिति चेन्न प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वस्यैव पौरुषेयत्वेन वेदे तदभावेनाऽपौरुषेयत्वस्यानपायात् । नहि पुरुषोच्चारितत्वं पौरुषेयत्वं तथात्वे मीमांसकम्मन्यस्यापि पौरुषेयत्वापातात् । वर्णनित्यत्ववादिनोऽपि विभूनां नित्यानां वर्णानां देशतः कालतश्च पौर्वापर्यरूपमानुपूर्व्यं नोपपद्यते । न चानुपूर्व्यमन्तरा वर्णानां पदत्वं पदानां च वाक्यत्वं वा सम्भवति । तस्मात्कण्ठताल्वाद्यभिघातजध्वनिषु वर्णाभिव्यक्तीनामेव कालतः पौर्वापर्यमुपपादनीयम् । तेनैव वर्णानां पदता, पदानाञ्च वाक्यतेत्युक्तमेव वाचस्पतिमिश्रैः—"व्यक्तीनां पौरुषेयत्वमकामेनाप्यभ्युपेयम् । तथा च न पुरुषोच्चरितत्वेन पौरुषेयत्वं किन्तु पूर्वानुपूर्वानुपूर्वीनैरपेक्ष्येणानुपूर्वीनिर्माणं स्वतन्त्रोच्चारणं वा पौरुषेयत्वं प्रथमोच्चारणं वा तत्त्वम्, वेदस्य तु न स्वतन्त्रोच्चारणं न वा पूर्वानुपूर्वीं नैरपेक्ष्येणोच्चारणं न वा कालिदासादिवाक्यस्येव प्रथमोच्चारणम् । अतएव न प्रमाणान्तरेणार्थमुपलभ्य निर्माणं किन्तु पूर्वकोटिशून्यायां सृष्टिप्रलयपरम्परायामनादिसिद्धेन परमेश्वरेण पूर्वपूर्वकल्पीयामानुपूर्वीं सर्वज्ञत्वेन सुप्तप्रतिबुद्धन्यायेन वा संस्मृत्योत्तरोत्तरकल्पीयानुपूर्वी निर्मीयते अतएव वेदस्य

ब्रह्मोपादानकत्वेऽपि न पौरुषेयत्वम् तद्रीत्यैव "तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांꣳसि जज्ञिरे तस्माद्यजुस्तस्माद-जायत" "अस्य महतो भूतस्य निःश्वसितमेतद्यद् ऋग्वेदः" इत्यादिवेदानामुत्पत्तिश्रवणम्। "वाचा विरूप नित्यया" "ऋचोऽक्षर परमे व्योमन्नधिविश्वे निषेदुः" 'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा' "अत एव च नित्यत्व" मित्यादि नित्यत्वश्रवणं स्मरणञ्चोपपद्यते। न च सृष्टेरीक्षणपूर्वकस्यस्योपपादितत्वाद्वेदसृष्टः कथमबुद्धिपूर्वकत्वं वक्तुं शक्यते, कार्यत्वेन बुद्धिपर्वकत्वेऽपि वाक्यार्थज्ञानत्वेन तदपूर्वकत्वेऽपि बाधाभावात्।

ननु जीववदन्तःकरणाभावेन ब्रह्मणो ज्ञातृत्वासम्भवेन कुतः सर्वज्ञत्वमिति चेन्न, सर्ववस्तुविषयकसर्वप्राणिबुद्धिसंस्कारोपरक्त-मायोपाधिकत्वेन सर्वज्ञत्वसिद्धौ बाधानापत्तेः। अथवान्तःकरण-परिणामवच्चित्प्रतिबिम्बग्राहिभिर्मायापरिणामैस्तत्सिद्धत्वात् परमेश्वर-स्य ज्ञातृत्वसम्भवेन अन्तःकरणराहित्येऽपि सर्वज्ञतासिद्धेः। तैरेव मायापरिणामात्मकवृत्तिप्रतिबिम्बितस्फुरणैः कालत्रयवर्तिनः प्रपञ्चस्यापरोक्ष्यात् सार्वज्ञ्यम्।

यद्यपि च अतीतानागतानामवर्तमानत्वेन विद्यमानमात्र-विषयकत्वेन प्रत्यक्षस्य न तद्विषयत्वसम्भवः। यद्यपि च रसस्य नेत्राद्यविषयत्ववत् न धर्माधर्मादेः प्रत्यक्षविषयत्वम् तथापि सर्वकारणस्य चैतन्यरूपस्य सर्वसंसृष्टत्वेन अतीतानागतानामपि कारणात्मना विद्यमानत्वात् सर्वविषयापरोक्ष्ये न काचिदनुपपत्तिः। परमेश्वरस्य यथा श्रोत्रादिनैरपेक्ष्येण शब्दाद्यवगमादौ जीववैलक्षण्यम् तथैव धर्माधर्मादिप्रत्यक्षादावपि वैलक्षण्यम्। 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः" इति श्रुतेः। अन्ये तु विद्यमाननिखिलसाक्षात्कारजनितसंस्कारवत्तयातीयातीताना

स्मरणम्। सृष्टेः प्राङ्मायाया जीवादृष्टानुरोधेन सृज्यमानपदार्थविषयकवृत्तिरूपेण विवर्तनात्। तत्साक्षितया तदुपाधिकस्य तत्साक्षितयानागतविज्ञानमुपपद्यत इत्याहुः।

वस्तुतस्तु सर्वकारणत्वाद्ब्रह्मणः स्वरूपज्ञानेनैव स्वसंसृष्टसर्वावभासकत्वेनैव सार्वज्ञ्यम्। अतीतानागतानां धर्माधर्मादीनाञ्च संस्कारात्मना सत्त्वेन तत्संसर्गस्याप्युपपत्तेः। ब्रह्मातिरिक्तस्य सर्वस्यैव वेदान्तमतरीत्या कार्यत्वेन धर्माधर्मादीनामपि तथात्वम्। कारणचैतन्यसंसृष्टत्वेन प्रमातृचैतन्याभिन्नत्ववत् ईश्वरचैतन्याभिन्नत्वेन आपरोक्ष्ये बाधाभावात्। स्वरूपज्ञानेनैव स्वसृष्टसर्वावभासकत्वपक्षे न वृत्तिज्ञानैर्ब्रह्मणः सर्वज्ञत्वम्। 'तमेव भान्तमनुभाति सर्वम्" इत्यवधारणश्रुतिविरोधात्। सृष्टेः प्राक् "एकमेवाद्वितीयम्" इत्यवधारणानुरोधेन महाभूतानामिव वृत्तिज्ञानानामपि प्रलयस्य वक्तव्यत्वेन ब्रह्मणस्तदा सर्वज्ञत्वाभावापत्त्या प्राथमिकमायाविवर्तरूपे ईक्षणे तत्पूर्वकमहाभूतादौ स्रष्टृत्वाभावप्रसङ्गाच्च, तथाच ब्रह्मणः सर्वविषयकज्ञानात्मकत्वमेव सर्वज्ञत्वमुक्तम्। सर्वज्ञानकर्तृत्वरूपं ब्रह्मणो नास्त्येव। 'यः सर्वज्ञः सर्ववित्" इति श्रुतिरपि तस्य सर्वज्ञानरूपत्वाभिप्रायेण योजनीया।

वाचस्पतिमिश्रास्तु यद्यपि ब्रह्मणः स्वरूपे चैतन्येनैव स्वसंसृष्टसर्वावभासकं तस्य च रूपणाकार्यत्वेऽपि दृश्यावच्छिन्नरूपेण ब्रह्मकार्यत्वेन ज्ञानकर्तृत्वश्रुतेरपि न विरोध इत्याहुः।

"जीवाश्रया ब्रह्मपदा अविद्या तत्त्ववित्मता" इति हि प्रसिद्धम् वाचस्पतिमते जीवाश्रयाया ब्रह्मविषयाया अविद्याया विपर्यीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतयोपादानम्, माया तु सहकारिमात्रम्, ब्रह्मणोऽविद्याविषयत्वे सत्त्वेऽपि सर्वज्ञस्य तस्याविद्याश्रयत्वायोगः। मू"ढोऽहं त्वां कथं जाने मोहितस्त्व

मायये”त्यादौ मोहविषयत्वे न दुर्ज्ञेयमाहात्म्यातिशयत्वं भगवत उच्यते। मोहाश्रयत्वेन मूढत्वापत्तिर्भगवति प्रसज्येतेति वाचस्पतिमतमेव भक्तिश्रद्धानुकूलम्। यद्यपि संक्षेपशारीरककृद्भिर्निर्विशेषचितिरेवाश्रयत्वविषयत्वभागिनीत्युपेयते पूर्वसिद्धतमसः पश्चिमस्य जीवस्येश्वरस्य वा नाश्रयत्वं न विषयत्वं वा सम्भवति” कार्यापेक्षयापूर्वतनस्यकारणस्य कार्याश्रयत्वायोगात्। वाचस्पतिमतरीत्या तु पूर्वपूर्वाध्यासव्यक्तीनामुत्तरोत्तराध्यासहेतुत्वेनादिसिद्धेऽध्यासात्मकेतमसिप्राथम्यायोग इति न तदनुपपत्तिः। न च “मायिनं तु महेश्वर”मिति श्रुति-विरोधः, गृही धनी देवदत्त इत्यादौ देवदत्तस्य गृहाद्याश्रयत्वाभावेऽपि प्रत्ययस्य स्वस्वामिभावलक्षणसम्बन्धान्तरबोधकत्ववन्महेश्वरस्य मायाश्रयत्वाभावेऽपि मायाब्रह्मणोर्विषयविषयिभावलक्षणसम्बन्धान्तरबोधकतया मायिनमिति श्रुत्युपपत्तेः। यथा शुक्तिरजतादेः पुरुषाश्रिताज्ञानविषयीकृतशुक्त्यवच्छिन्नब्रह्मचैतन्यविवर्तत्वं तथैव जीवाश्रिताज्ञानविषयीकृतब्रह्मविवर्तत्वमिति सुसङ्गतोऽयं पक्षः।

समेषामास्तिकानां धर्मब्रह्मप्रतिपादकत्वेन वेदानामेवासाधारणः समादरः। वाचस्पतिमिश्राश्चास्तिकशिरोमणयः शास्त्रयोनित्वाद्यधिकरणे सविशेषं स्वरूपं प्रामाण्यञ्च तेषां ते प्रतिपादयामासुः। चातुर्वर्ण्यस्य चातुराश्रमस्य च यथायथं निषेकादिश्मशानान्तासु ब्राह्ममुहूर्तोपक्रम-प्रदोषपरिसमाप्तनीयासु नित्यनैमित्तिककाम्यकर्मपद्धतिषु च ब्रह्मत्वे च शिष्याणां शासनाच्छास्त्रं ऋग्वेदादि महाविषयत्वान्महत्पुराणन्यायमीमांसादिभिरङ्गोपाङ्गरूपबृंहितत्वेन च तन्महदिति। तेषाञ्च प्रतीपवत्सर्वार्थावद्योतकत्वेनानवबोधकत्वलक्षणमप्रामाण्यमपाकृतम्। स्पष्टबोधकत्वोक्त्यान्यादृशमप्यप्रामाण्यं वारितम्। ईश्वरस्य ज्ञानं सर्वविषयं शास्त्रस्याभिधानं सर्वविषयम्।

परमेश्वरनिश्वसितत्वेन निश्वासवदेव पुरुषबुद्धिप्रयत्नविशेषानपेक्षत्वेनाकृत्रिमत्वमपास्तसमस्तपुंदोषशङ्काकलङ्कपङ्कत्वम्, पूर्वमीमांसकैः पुरुषसम्बन्धाभावादपौरुषेयत्वमुच्यते। वाचस्पतिमिश्रैस्तु पुरुषसम्बन्धेऽपि पुरुषस्य तत्रास्वातन्त्र्येणापौरुषेयत्वमुच्यते। ब्रह्मातिरिक्तस्य सर्वस्यैव ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेन वर्णनित्यत्वानभ्युपगमेऽपि पूर्वमीमांसकानामिवोत्तरमीमांसकानामप्यपौरुषेयत्वमक्षुण्णमेवेत्युक्तमेव येऽपि वर्णानां नित्यत्वमास्थिषत तैरपि पदवाक्यादीनामनित्यत्वमभ्युपेयम्। आनुपूर्वीभेदवन्तो हि वर्णाः पदम्, पदानि च आनुपूर्वी भेदवन्ति वाक्यम्। व्यक्तिधर्मश्चानुपूर्वी न वर्णधर्मोऽवर्णानां नित्यानां विभूनाञ्च कालतो देशतो वा पौर्वापर्यायोगात्। व्यक्तिश्चानित्येति कथं तदुपगृहीतानां वर्णानां नित्यानामपि पदता नित्या? पदानित्यतया च वाक्यादीनामप्यनित्यता व्याख्याता। अतएव नृत्तानुकरणवत्पदाद्यनुकरणमेव। नर्तको यादृग्गात्रविक्षेपादिकं करोति तादृशमेव शिक्ष्यमाणानुकरोति नर्तकी। एवमेवाचार्यो वैदिकानां वर्णपदादीनां यादृशीमानुपूर्वीं करोति तादृशीमनुकरोति माणवकः। आचार्यवर्णव्यक्तिभ्यो माणवकवर्णव्यक्तीनां भिन्नत्वात्। ततश्च लौकिक-वैदिकपदवाक्यादिपौरुषेयत्वं नित्यानित्यादिवर्णवादिनां समानमेव। किन्तु वेदवाक्येषु पुरुषस्वातन्त्र्यास्वातन्त्र्ये एव परं विप्रतिपत्तिः। तदुक्तं भट्टपादैरपि—"यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता।" यथा यागादिब्रह्महत्यादयो ब्रह्मविपर्ता अपि न सर्गान्तरे विपरियन्ति यथा तेजोऽबादिभूतानां दाहकत्वादिस्वभावो न विपर्येति एवमेव सर्गेऽस्मिन् यथा नियतानुपूर्व्यं वेदाध्ययनम् निःश्रेयसहेतुरन्यथा तदेव वाग्वज्रतयानर्थहेतुरेवं सर्गान्तरेष्वपि। तदनुरोधान् सर्वज्ञोऽपि सर्वशक्तिरपि पूर्वपूर्वसर्गानुसारेण विरचयन्न स्वतन्त्रः। पुरुषास्वातन्त्र्यमेवापौरुषेयत्वमिति जैमिनीया

अपि रोचयन्ते । तदुक्तमेव—"यत्नतः प्रतिषेध्या नः पुरुषाण स्वतन्त्रते"ति । नचैकस्य ऽतिभानेऽनाश्वास इति युक्तम् । नहि वहूनामप्यज्ञानां विज्ञानां वाऽऽशयदोषवतां प्रतिभाने युक्त आश्वासः तत्त्वज्ञानतश्चापास्तसमस्तदोषस्यैकस्यापि प्रतिभाने युक्तएवाश्वासः । सर्गादिभुवां प्रजापतिदेवर्षीणां धर्मज्ञानं वैराग्यै-श्वर्यसम्पनानामुपपद्यते तत्स्वरूपावधारणम् । तत्प्रत्ययेन चार्वाचीनानामपि तत्र सम्प्रत्ययः ।

यथाग्निहोत्रादिचोदनावाक्यैरग्निहोत्रादीनां स्वर्गादिभिः कार्य-कारणभावोऽवगम्यते तथैव वेदान्तवाक्यैः सर्वज्ञस्य सर्वशक्तिमतः परमेश्वरस्य जगत्कारणत्वं शास्त्रयोनित्वञ्च विज्ञायते । यद्यपि पूर्वकालो न वेदशून्यः कालत्वाद् वर्तमानकालवत् इत्यादित्या वर्णपदवाक्यरूपस्य वेदस्य नित्यत्वमपौरुषेयत्वञ्चोपपद्यते, तथापि तन्नोपपद्यते सावयवत्वेन जगतः कार्यत्वसिद्धया कार्यत्वेन चानित्यत्वसिद्धयांशिकप्रलयस्य प्रत्यक्षसिद्धत्वेन समष्टिप्रलयस्या-प्यनुमातुं शक्यत्वात् । वेदान्तेषु च स्पष्टं सृष्ट्यादिकं श्रूयते । प्रतिज्ञादृष्टान्तोपरोधाद्यापत्त्या वेदान्तिभिर्ब्रह्मातिरिक्तस्य सर्वस्यैव कार्यत्वाभ्युपगमेन वेदस्य कार्यत्वेऽपि प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वरूपप्रथमोच्चारणलक्षणस्य पौरुषेयत्वस्याभावादपौरुषेयत्व मेव, न वेदनित्यत्वाभ्युपगमादिकमास्तिक्यप्रयोजकम्, किन्तु तत्प्रामाण्याभ्युपगमस्यैव तद्धेतुत्वम् । "अत्र वेदा अवेदा भवन्ति" "वेदास्तं परादुर्योऽन्यत्रात्मनो वेदान् वेदे"त्यादिश्रुतिभिरेव वेदानां ब्रह्मानतिरिक्तत्वं बोध्यते । तदनुराधेनैव वाचा विरूप नित्यया इत्यादिनित्यत्वप्रतिपादकवचनानां प्रवाहनित्यत्वबोधनपरत्वमेवा-भ्युपगन्तव्यमित्युक्तमेव । वेदार्थस्य धर्मस्य ब्रह्मणो वा प्रत्यक्षाद्य-विषयत्वेन तत्राज्ञातज्ञापकस्यापौरुषेयत्वेनापास्तसमस्तभ्रमप्रमा-दादिपुदोषशङ्काकलङ्कस्य वेदादिलक्षणशास्त्रस्यैव प्रामाण्यम्,

तत्र यथा चक्षुषैव रूपमुपलभ्यते नान्येन श्रोत्रादिनेत्यन्य-योगव्यवच्छेदोऽभिप्रेतस्तथैवालोकादिसहकृतेन निर्दोषमनः संयुक्तेन विमलेन चक्षुषा रूपमुपलभ्यत एव न नोपलभ्यत इत्ययोगव्यवच्छेदोऽप्यभिप्रेत एवमेव चोदनैव लक्षणं धर्मस्य नान्यत् प्रत्यक्षादिकम्, चोदना च लक्षण-(बोधक-) मेव धर्मस्येति रीत्याऽयोगान्ययोगव्यावृत्त्यैव चोदनाया धर्मे प्रामाण्यमेवं शास्त्रमेव योनिः स्वरूपसिद्धौ प्रमाणं यस्य, शास्त्रञ्च योनिरेव तत्स्वरूपसिद्धावित्यादावपि बोध्यम्, यथाऽऽ-लोकादि सहकार्यभावे चक्षुषा रूपानुपलब्धावपि नायोगस्तथैवसाध-नसम्पत्त्युपक्रमोपसंहरादिभिर्विचाराभावे शास्त्रस्य तदलक्षकत्वेऽपि नायोगः शक्यशङ्कः। नैतावदेव प्रपञ्चस्य मिथ्यात्वसत्यत्वग्राहिणोः श्रुतिप्रत्यक्षयोर्विरोधेऽपि दोषाशङ्काकलङ्कित्वेन प्रथमप्रवृत्तस्यापि प्रत्यक्षस्य दौर्बल्यम्, निर्दोषत्वेनापच्छेदन्यायेन परत्वाच्च श्रुतेरेव प्राबल्यम्, तत एव पृथिव्यादिषु सङ्कीर्णतया प्रतीयमानानां गन्धा-दीनां "उपलभ्याप्सु चेद् गन्धं केचिद्ब्रूयुरनैपुणाः। पृथिव्यामेव तं विद्यादपो वायुञ्च संश्रितम्॥" व्यवस्थाया वक्तव्यत्वेन प्रत्य-क्षादागमप्राबल्यं निर्विशङ्कमेव। पृथिव्यादीनां परस्परव्यतिषक्त-तयाऽन्योन्यधर्माणामन्योन्यस्मिन्नवभासः सम्भवत्येवेति प्रत्यक्षस्य शङ्कितदोषत्वेन निर्दोषस्यागमस्यैव प्राबल्यं स्पष्टम्।

न चैवमागमस्य प्रत्यक्षात्प्राबल्ये "यजमानः प्रस्तरः "आदित्यो यूपः' इत्यादौ प्रत्यक्षाविरोधाय यजमानादित्यादिशब्दानां प्रस्तर-यूपादिषु गौणीवृत्तिरनाश्रयणीया स्यात्। सोमेन यजेदित्यत्र च वैयधिकरण्येनान्वये यागसोमयोरिष्टयागसाधनत्वबोधने वाक्य-भेदप्रसक्त्या सामानाधिकरण्येनान्वये प्रत्यक्षाविरोधाय सोमवता यागेनेति मत्वर्थलक्षणा च न कल्पनीया। सत्यपि प्रत्यक्षविरोधे

प्रबलेनागमेन प्रस्तरे यजमानाभेदस्य यागे सोमाभेदस्य च सिद्धि सम्भवादिति चेदत्र भामतीकारास्तात्पर्यवती श्रुतिरेव प्रत्यक्षाद्बलीयसी न श्रुतिमात्रं मन्त्रार्थवादानां तु स्तुतिद्वारम्। तेऽवान्तरेऽर्थे वाक्यार्थद्वारभूते पदार्थे इव न तात्पर्यम्। न च द्वारभूतेऽवान्तर वाक्यार्थे तात्पर्याभावे मानान्तराविरुद्धदेवताविग्रहादिरन्यपरेभ्यो मन्त्रार्थवादेभ्यो न सेत्स्यति तात्पर्यवत्येव शब्दस्य प्रामाण्यनियमादिति वाच्यम्, एतस्यैव रेवतीषु वारयन्तीयमग्निष्टोमसामकृत्वा पशुकामो ह्येतेन यजेतेति विशिष्टविधेस्तात्पर्यगोचरेऽपि विशेषणस्वरूपे प्रामाण्यदर्शनेनोक्तनियमासिद्धेरत्र हि रेवती ऋगाधारं वारयन्तीयं सामविशेषणं, न च सोमादिविशेषणवदेतत्प्रसिद्धं, येन वाक्यस्य तद्विशिष्टयागविधिमात्रे प्रामाण्यं स्यात्, न वा विशिष्टविधिना विशेषणाक्षेप, आक्षेपाद्विशेषण प्रतिपत्तौ विशिष्टगोचरो विधिर्विशिष्टविधौ च तेन विशेषणाक्षेप इति परस्पराश्रयतापत्तेरतो शिष्टविधिपरस्यैव वाक्यस्य विशेषणस्वरूपेऽपि प्रामाण्यमभ्युपगन्तव्यं, न च तत्रापि तात्पर्यम्, उभयत्र तात्पर्ये वाक्यभेदप्रसङ्गात्। एवं मन्त्रार्थवादानामपि विधेयस्तुति-कर्मस्मरण पर्यवसितानां तद्द्वारभूतेऽर्थे न तात्पर्यमित्यतत्परेभ्यस्तेभ्यः प्रत्यक्षस्यैव प्राबल्येन तदविरोधाय वृत्त्यन्तरकल्पनम्।

सोमेन यजेतत्यत्र विशिष्टविधिपरे वाक्ये सोमद्रव्याभिन्नयागरूपं विशिष्टं विधेयमित्यभ्युपगमे तस्य विधेयस्य दध्ना जुहोतीत्यादौ विधेयस्य दध्यादेरिव लोकसिद्धत्वाभावेन विधिपराद्वाक्यादेव रेवत्याधारवारवन्तीयविशेषणस्यैव विना तात्पर्यं सिद्धिरेष्टव्या। नहि तात्पर्यविरहितादागमात्। यागसोमलताभेदवाहि प्रत्यक्षविरुद्धार्थः सिद्ध्यतीति तत्रापि तदविरोधाय मत्वर्थलक्षणाश्रयणम् सिद्धान्तलेशे। अद्वैतश्रुतिस्तूपक्रमोपसंहारैकरूप्यादिषड्विधालि-

ज्ञावगताद्वैततात्पर्या प्रत्यक्षाद्बलवतीति ततः प्रत्यक्षस्यैवबाधो न तद-विरोधाय श्रुतेरन्याथानयनम्। यत्तूक्तं न तात्पर्यवत्त्वेन प्रत्यक्षाच्छ्रुतेः प्राबल्यं कृष्णत्वं श्रपयेदिति विधेः श्रपणस्य कृष्णालार्थप्रति पादने तात्पर्येऽपिकृष्णाले रूपरसपरावृत्ति प्रादुर्भावपर्यन्तमुखयश्रपणसंबंधः प्रत्यक्षविरुद्धइति तदविरोधाय श्रवणशब्दस्योष्णीकरणमात्रे लक्षणाभ्युगमादिति तन्न शास्त्रस्यानधिगतगन्तृत्वेनाकृतकर्तृत्वाभावात्। नहि शास्त्रस्य बलवत्त्वेन श्रपणानर्हस्य श्रपणविधानं सम्भवत्यशक्यस्यो-पदेशायोगात्। अद्वैतश्रुतिविरोधेन प्रत्यक्षस्य व्यावहारिकविषय-त्वेनाप्युपपत्तिर्भवति कृष्णाले श्रपणस्याशक्यत्वादुष्णीकरणे लक्षणा न प्रत्यक्षविरोधात्तदुक्तमेव सिद्धान्तलेशसंग्रहे "अथवा कृष्णालं श्रपये'दित्यादौ न प्रत्यक्षानुरोधेन लक्षणा किन्तु अनुष्ठानाशक्त्या।

सर्वभूतहितैषिणां परमकारुणिकानामपि लौकिकवैदिकसामर्थ्या-नुरोधेनाधिकारानधिकारव्यवस्था सम्मता। तत एव शास्त्रीय-सामर्थ्यविधुराणां लौकिकसामर्थ्यवतामपि शूद्रादीनां वेदाध्ययन-तदर्थानुष्ठानादि नानुमतमिति सूत्रभाष्यभामत्यादिषु स्पष्टम्। यथा विधिविहितमध्ययनादि निःश्रेयसकरं तथैव निषिद्धं विधि-विरुद्धञ्च तदनिष्टकरमपि भवत्येव। 'पुराणन्यायमीमांसाधर्म-शास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥'; इति याज्ञवल्क्यस्मृतौ मिताक्षराकारैरेतानि त्रैवर्णिकैरध्येतव्यानी-त्युक्त्वा तत्र प्रमाणरूपेण।

"निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित्॥"

इति मनुवचनमुद्धृतम्।

"वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत्।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात्॥"

इति विस्णुसहस्रनामपाठादिफलबोधके वाक्यं स्वभाष्ये श्रीशङ्कराचार्येण शूद्रः श्रवणात्सुखमवाप्नुयात् इति रीत्या शूद्रस्य विष्णुसहस्रनामपाठं निषिद्ध्य तच्छ्रवणमेव व्याख्यातम्। बृहदारण्यकोपनिषद्भाष्ये च 'य इच्छेद् दुहिता मे पण्डिता स्य.दित्यत्र पाण्डित्यमत्र गृहकार्यकौशलं तस्या अध्ययनानधिकारादित्युक्तम्। तस्या यावदुक्तमित्यादि जैमिनिसूत्रे शबरस्वामिनापि 'अतुल्या हि स्त्रीपुंसाऽतुल्यता च द्वेधा स्त्रीत्वादविधात्वाच्चेत्युक्तम्। स्कान्दे

"नाध्यापयेद्बुधः शूद्रं तथा नैव च याजयेत्।
इतिहासं पुराणञ्च काव्यं नाटकमेव च॥"

तत्रैव च नोच्चरेत्संस्कृतां गिरमित्यप्युक्तम्। संस्कृता वाग् द्विजातीनामेवेति वाल्मीकीये रामायणे स्पष्टम्। तत्र सुन्दरकाण्डे हनुमताप्युक्तम्।

"यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्।
रावणं मन्यमाना मां सीता भीता भविष्यति॥"

अत एव मानुषीं वाचमवलम्ब्य तेन सीता भाषिता। सर्वमेतत्प्रक्षिप्तमित्युक्तिमन्तरा शास्त्रप्रामाण्याभ्युपगन्तृभि संस्कृतस्य राष्ट्रभाषात्वस्वीकारेण सर्वसाधारणाधिकारः कथं साधयितुं शक्य इति त एव विदाङ्कुर्वन्तु। वाचस्पतिमिश्रास्तु यदि न्यायसूत्रभाष्यादिभिरनधिकारिणां व्युत्पत्तिर्भवेत्तदा सूत्रकारादीनां तु तपःप्रभावात्तन्मार्जनं सम्भवति परं मन्दतपसान्तु तद्व्युत्पादनप्रवृत्तौ दोषमेव वदन्ति वार्तिकतात्पर्यटीकायाम्—"न वा नधिकृतव्युत्पादनेनास्य तपोनिधेः कश्चन दोषस्तथा च विश्वामित्रस्त्रिशङ्कुं याजयामास, वशिष्ठश्चाधमयोनिजामक्षमालामु-

पयेमे, तपःप्रभाव एव हि तादृशस्तेषां यत एवंविधाः पाप्मानो वलीयन्ते। न चास्मदादीनां मन्दतपसामयं प्रसङ्गः।

न हि गजानामुदर्येण तेजसा वटकाष्ठमशितं पच्यत इत्यस्मदादीनामपि उदर्येण तेजसा तथा भवितव्यम्। नैवात्र मनागपि द्वेषलेशावकाशः सर्वहितैषिणां तदसम्भवात्। यथा मल्लचन्द्रोदयादिरससेवने न सर्वेषां निर्विशेषाधिकारः केषाञ्चित्तस्यानिरुक्तष्टकरत्वदर्शनात्तद्वदेवात्रात्पवगन्तव्यम्। यथाधिकारमेवागमोपयोगायोग्यस्तथैव यथाधिकारमेव धर्मोऽपि धर्त्तव्यः। पुराणश्रवणादिद्वारा भगवद्भक्तिज्ञानादिषु समेषामधिकारसमर्थनात्। न च "दैवी वाग् व्यवकीर्णेयमशक्तैरभिधातृभिः" वाक्यपदीयरीत्या नित्यसिद्धाया दैव्या एव वाचः प्रयोक्तृणामशक्त्यैव व्यवकीर्णतेति सुतरां शक्तिमतां तु संस्कृतैव वागभ्युपेतव्येति वाच्यम्, शूद्रादीनां वैदिकेषु कर्मस्विव लौकिकशक्तिसत्त्वेऽपि शास्त्रीयशक्तेरभावात्। न च संस्कृताया वाचो भिन्ना मानुषी वाक् पूर्वं नासीदिति वाच्यम् 'स यदि मानुषीं वाचं व्याहरेत् वैष्णवीमृचं वजुर्वा जपेदिति शतपथश्रुत्या संस्कृताया वाचो भिन्नाया मानुष्या वाचो यज्ञकाले प्रयोगेण प्रायश्चित्तं विहितं तेनानादिश्रुतिप्रमाणसिद्धं मानुषीणां वाचामनादित्वम्। न च वैदिकीं वाचमपेक्ष्य संस्कृताया एव वाचो मानुषीत्वमिति वाच्यम्, प्रयागकाले पौरुषे सूत्रादिप्रयोगे तथा प्रायश्चित्ताविधानात्। संस्कृताया वाचो यज्ञकाले प्रयोगदर्शनात्। अध्यगमत्सेयं वेदप्रामाण्यमीमांसा परिपूर्णताम्। अत्र मीमांसिता मीमांसनीया। समीक्षिताः समीक्षणीयाः, समाहिता समाधानीयाः, उत्तरिता उत्तरणीयाः परीक्षिताश्च परीक्षणीयाः। वेदेषु प्रामाण्यमाधृत्य विवदमानानां सौगता, दिवसनाश्च सन्ति वैप पक्षिणः। आधुनिका अपि कतिपये पाश्चात्यसंस्कारसंस्कृता

भवन्ति प्रत्यालोचयितारः। सिद्धान्तिनश्च भायन्ते नैयायिका, मीमांसका वेदान्तिनश्च। अपरेऽपि विद्यन्ते वेदश्रद्धालवो मनीषिणः सिद्धान्तपक्षे। यद्यपि प्रामाण्यांशेऽपि भूयांसः प्रतिलोमव्यवहारा अवतरन्ति, तदर्थमुद्भावयन्ति अंशानाक्षेपार्हान् तथापि अपौरुषेयेणैवैकेन स्थापितेन सर्वे प्रतिविधीयन्ते। तदर्थं शास्त्रोक्ता-युक्तयः प्रमाणानि च उपन्यस्य सर्वे यथावत्प्रतिविहिताः। आधुनिकाश्च आक्षेपा नव्यैरपि तर्कैः कुण्ठीकृताः। अत्र प्रामाण्यापौरुषेयत्वयोः सिद्धान्तित्वे उपशतं कोटिप्रकोटयः सम्यग् विस्तरेण निरूपिताः। प्रसक्तानुप्रसक्तानि विचारान्तराण्यपि यथास्थानं सन्निवेशितानि चरमाश्च युक्तयो वेदान्तसम्प्रतिपन्नाः प्रतिवादिभ्योऽपि रोचेरन्। विज्ञास्तु सन्तुष्येयुरेव समुपलभ्य मीमांसामिमां गुणग्रहणैकपक्षपातिनः पर्यवसाने च श्रीविश्वेश्वर-चरणारविन्दयोः कृतिमिमां सादरभरं समर्पये। ॐ तत्सत्।

एम. ए.
बुलानाला, बनारस